Vivek

1

કાવ્યપ્રકાશ

P.

$5 \times 2 = 10$ pp. Min

$5 \times 3 = 15$ pp. Max.

speed required

10–15 mins a p.

45
25
40
60
65 | 70

$6 \times 4 = 24$
15
Total 39 − 3 = 36

2. $10 \times 4 = 40$
15
55 − 15 = 40

3. $10 \times 2 = 20$
$12 \times 2 = 24$
15

I = 5 પ્રશ્નો
II = 9 પ્રશ્નો
III − 2 પ્રશ્નો (નો ગુજરાતી [illegible]) +1
VII − 2 પ્રશ્નો
VIII − 5 પ્રશ્નો
− 2 [illegible]

Main stress on the [illegible]

1. શ્લોક [illegible]
2. [illegible]
3. I + II + IV [illegible]
4. Text Book − [illegible]
5. Text Book [illegible]

48
15
63 − 20

8/10

પ્રશ્નો
I — 4 ✓
II — 9 Nine. ✓
III — 2 ✓
VII — 2
VIII — 4
IX−X — 22 ✓
IV — 4 (12 પ્રશ્નો મે માનવાનુરૂપ)

16
7॥ (1 Para) [illegible]
5॥ (1 Para)
5॥ (1 Para)
7 (4॥ Next [illegible] 3॥)

$1 + 1 + \frac{1}{2}$ P. = $3\frac{1}{2}$ pp. = for one [illegible]

$17\frac{1}{2}$ pp = 17 pp.
$3\frac{1}{2} + 3\frac{1}{2} + 3\frac{1}{2} + 3\frac{1}{2} + 3\frac{1}{2}$

1st half = $\frac{1}{2}$ P. (3॥ + 6॥) (3॥ [illegible])

2nd half = $\frac{1}{2}$ P. (7॥ + 2॥ … (5॥)) (दो॥ उसी में शेष [illegible] में)

8॥ = प्रति अनुच्छेद
प्रति पृष्ठ = [illegible] दो ॥ से नया पेरा
उपसंहार = 6॥ [illegible] = 7॥

5 पूर्णाङ्क

प्रश्न 5 — नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥१॥
इमं कारिकां व्याख्येया ? (काव्यप्रकाश)

उत्तरम् : आचार्य मम्मटः स्वकीये ग्रन्थे काव्यप्रकाशे मङ्गलाचरण रूपेण इमां कारिकां कवि-महिमा रूपेण दर्शयति । आचार्यस्य इदं कथनमस्ति यत् कविसृष्टिः ईश्वरस्य सृष्टेः अपेक्षया उच्चतरा तथा च महत्वपूर्णा अस्ति कवि सृष्टिः चत्वारः कारणः श्रेष्ठतरं गणयति आचार्यः यथा :-

(1) नियतिकृतनियमरहिता :-

इयं कवि-कृतिः नियति कृतेभ्यः नियमेभ्यः सर्वथा रहिता अस्ति । विधातुः इयं सृष्टिः अदृष्टानां, दृष्टानां प्रकृति-नियमानां कारणेन सर्वथा ~~नियन्त्रणः~~ नियन्त्रिता अस्ति । संसारे वयं पश्यामः यत् प्राचीन परम्परानुसारेण पुष्पेभ्यः सुगन्धिः, शरीर-त्यागात् स्वर्ग प्राप्तिः, दिनस्य पश्चात् रात्रिः, पुष्पस्य पश्चात् फलं, प्रातःकाले सूर्योदयः, रात्रौ चन्द्र प्रकाशः इति निर्धारिताः सन्ति । परन्तु काव्य-सृष्टिः सर्वथा स्वतन्त्रा अस्ति । कविः ईश्वरस्य नियमेभ्यः ~~भिन्नानि वस्तु~~ (भिन्नस्य वस्तुनः) वर्णनं करोति कथितमपि अस्ति "जहाँ न पहुँचे रवि वहाँ पहुँचे कवि" मुखात् सौरभः तथा च कवीनां विस्मयो संसारे सशरीरं स्वर्ग-प्राप्तिः यथा कथितमपि अस्ति - अपारे काव्य-संसारे कविरेव प्रजापतिः ।

यथास्मै रोचते विश्वं ~~तथैव~~ तथेदं ~~परिवर्तते~~ कल्पते ॥

अतः कविसृष्टिः सर्वथा नियतिकृत नियमरहिता अस्ति ।

2 ह्लादैकमयी —

कविसृष्टौ आनन्द एव आनन्दः, ईश्वरस्य सृष्टौ क्वचित् सुखं, क्वचित् दुःखं, क्वचित् जन्म, क्वचित् च मरणं, क्वचित् वर-यात्रा, क्वचिच्च शव यात्रा, परन्तु कविरचनायां दुःखस्य मोहस्य च अंशमात्रमपि नास्ति । कवितायाः मुख्य प्रयोजनं आनन्दस्य प्राप्तिरेव अस्ति । यद्यपि काव्ये दुःख-सुखानां, यशशोकानां वर्णनमस्ति परन्तु एते सर्वे भावाः काव्ये आगत्य आनन्द रूपं धारयन्ति । ~~[illegible]~~ । अतः ह्लादैकमयी इयं सृष्टिः ।

3 अनन्यपरतन्त्रा —

ईश्वरस्य (सृष्टौ) एकं द्वितीयस्याधीनमस्ति । समवायिकारणं, असमवायिकारणं, निमित्तकारणं च इति सन्ति त्रीणि कारणानि । किन्तु कविसृष्टिः कस्यापि कारणस्य अपेक्षां न करोति । प्रतिभा, निपुणता तथा च अभ्यासः एतानि त्रीणि कारणानि काव्यस्य हेतुरूपाणि । अतः कवेः वाणी सर्वतन्त्र स्वतन्त्रा ।

4 नवरसरुचिराः —

विद्वांसः सृष्टौ वयं षड् रसाः मधुरः अम्लः, लवणः, कटुः, कषायः तथा च तिक्तः इत्येव

शृङ्गार-वीर-करुणाद्भुत-हास्य-भयानकाः
बीभत्सरौद्रौ शान्तश्च रसाः नव प्रकीर्तिताः॥

महत्त्वं

प्राप्नुमः। रसाः रसं कदाचित द्वितीयस्य रसस्य सहायकः क्वचिच्च विरोधी। परन्तु कविसृष्ट्या वयं नव प्रकारणां रसानाम् अनुभवं कुर्मः। यथा (प्रथमन्तु संस्थायी काव्यरसाः आधिकाः, द्वितीयन्तु सञ्चारी-विलक्षणा तथा च आनन्द दायकाः। काव्यस्य इमे रसाः परस्पर सहायकाः न तु विरोधिनः। इदम् स्थायीभाव इमान् योग्यमस्ति, इमे काव्यरसं केवलं सहृदयजनाः एव अनुभवन्ति। केवलं स्वकीयं स्थायीभावं आश्रित्य इमे रसाः भिन्नरूपाः रस-सञ्चारः सन्ति। कवि वाणी द्वारा ब्रह्मणः सृष्टेः विलक्षणा अलौकिक सृष्ट्याः प्रादुर्भावः भवति। अनेन कारणेन कवि-सृष्टिः ईश्वर-सृष्टेः उच्चतरा अस्ति। अत एव एतादृशी महत्वपूर्णा वाक्-देवी सरस्वती आचार्यः प्रणमति। अतः एतैः चतुर्भिः कारणैः काव्य-सृष्टिः ईश्वर-सृष्टिं निर्मितं करोति। निम्न

प्रश्न

काव्यस्य किं प्रयोजनं "कानि प्रयोजनानि इति विस्तरेण प्रदर्शनीयम्?

उत्तरम्— संसारे यः कश्चिद् किमपि कार्यं करोति तत् कार्यं प्रति तस्य प्रयोजनं अवश्यमेव भवति कथितमपि अस्ति-

प्रयोजनं अनुद्दिश्य मन्दोऽपि न प्रवर्तते। अर्थात् मन्द जनाः "मूर्खजनाः" अपि बिना प्रयोजनं किमपि न करोति। मूर्ख जनस्य कार्यमपि यदा सप्रयोजनं भवति तर्हि अन्येषां विशेष-रूपेण कवीनां कार्यस्य किं कथनम्। संस्कृतस्य सर्वे आचार्याः निज सिद्धान्त-ग्रन्थेषु काव्यप्रयोजनानां उल्लेखं भिन्न-2 रूपेण कृतवन्तः। परन्तु विशेष-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥

4

[illegible] विश्वनाथस्य धर्मार्थ काम मोक्ष-रूप पुरुषार्थ-चतुष्टयस्य उल्लेखः प्राप्नुमः। तस्मादपि पूर्वमेव मम्मटस्य काव्यप्रयोजनं प्राथमिकं तथा च परवर्तिभिः अनेकैः आचार्यैः स्वीकृतं समर्थितं चास्ति। तस्य मतानुसारेण इमानि सन्ति काव्यस्य प्रयोजनानि। यथा—

(1) **यशसे (2) अर्थकृते (3) व्यवहारविदे (4) शिवेतरक्षतये (5) सद्यःपरनिर्वृतये (6) कान्तासम्मिततयोपदेशयुजे।**

क्रमेण तेषां प्रयोजनानाम् अत्र सोदाहरणं उल्लेखः अस्माभिः क्रियते।

(1) यशसे :- 100

काव्यद्वारा यशःप्राप्तिः प्राचीन कालादेव सर्वविदितम् अस्ति। कालिदासस्य श्रीहर्षस्य इत्यादीनां कवीनां काव्यद्वारा एव यशसः प्राप्तिः सञ्जाता। यद्यपि वर्तमान समये ते कवयः शारीरिक रूपेण जीविताः न सन्ति परन्तु काव्यरूपेण ते सन्ति अमराः। यावत् कालं तेषां साहित्यं तावत् तेषां यशः स्थास्यति।

2 अर्थकृते :

अर्थस्य प्राप्तिरपि काव्यद्वारा सरलतया भवति। प्राचीन काले श्रीहर्षादि धावकादयः कवयः प्रचुर मात्रायां धनार्जनं कुर्वन्ति स्म। इदानीमपि उचित काव्यस्य माध्यमेन काव्यकाराणां धनप्राप्तिः भवति एव। यत् काव्यं समाजस्य उपयोगे आगच्छति तेन काव्येन [struck-through word] काव्यकारस्य अर्थप्राप्तिः भवति एव।

3 व्यवहारविदे :-

कीदृशं ?

काव्यस्य पठनपाठनेन व्यवहारस्य ज्ञानं सरलतया भवति । उचितकाव्यं अस्माकं मार्गदर्शनं करोति । अस्माकं व्यवहारः केन सह कदा कीदृशः भवेत् ? एतद् सर्वं ज्ञानं काव्यद्वारा एव सम्भवं भवति । अस्माभिः रामादिवत् प्रवर्तितव्यम् न तु रावणादिवत् उचित व्यवहारेण सामाजिकजीवने च राजद्वारेषु सभागारेषु सम्मानितो भवति मानवः ।

शिवेतरक्षतये :

शिवं = कल्याणं तस्माद् इतरं भिन्नं अकल्याणं, तस्य क्षतिः अपि काव्य-द्वारा भवति । काव्य रचनया अनेके कवयः स्वपापानां तापशापानां निवारणं कृतवन्तः । प्राचीन काले मयूरादयः कवयः विभिन्न देवानां स्तुतिद्वारा कष्टनिवारणं अनर्थदूरीकरणं च सम्पादितवन्तः । मयूरस्य सूर्य शतकं अस्य उदाहरणमस्ति । इदानीमपि समाजे वयं पश्यामः यत् कस्यचित् अपि प्रकारस्य अनिष्टस्य शान्तये देवानां कीर्तनं क्रियते कार्यते च सामाजिकैः जनैः ।

सद्यः परनिर्वृतये :

सद्यः परनिर्वृतये अर्थात् सद्य = तत्काल परनिर्वृति = आनन्दस्य च प्राप्तिः काव्यद्वारा भवति । काव्यद्वारा या निर्वृति अर्थात् आनन्दस्य प्राप्तिः भवति सः आनन्दः सर्वथा अलौकिकः भवति, तादृशस्य आनन्दस्य अनुभूतिः काव्यस्य मुख्यप्रयोजनमस्ति । एतादृशं प्रयोजनं अन्येभ्यः प्रयोजनेभ्यः सर्वथा भिन्नं

महत्वपूर्णं च भवति । अग्रेऽपि विशेषरूपेण उल्लेखनीयमस्ति यत् यस्मिन् समये सहृदयाः जनाः समाधिस्थयोगिवत् इव आनन्दम् अनुभवति तस्मिन् काले तस्य अन्यवस्तूनां पदार्थानां च ज्ञानं न भवति ।

कान्तासम्मिततयोपदेशयुजे :-

संसारे कस्यापि कार्यस्य सम्पादनाय प्रभुतुल्यैः मित्रतुल्यैः तथा च कान्तातुल्यैः इति उपदेशैः प्रेरणा मिलति । वेद शास्त्राणां उपदेशः नृपादीनां च निर्देशः प्रभुतुल्यः भवति । मित्रतुल्ये उपदेशे ज्ञानमपि अनुकरणीयं भवति परन्तु कान्तातुल्यः उपदेशः सर्वथा अद्भुत कार्यं भवति । समाजे वयं पश्यामः यत् कोऽपि जनः कस्यापि कथनस्य पालनं करोति अथवा न करोति, एतत् सर्वं तस्य इच्छायां निर्भरं भवति । परन्तु प्रेम भावेन यदा तस्य पत्नी सरलवचनैः किमपि करणाय कथयति तदा सः जनः पत्न्याः कथनस्य कदापि निरादरं न करोति तथैव काव्यस्य उपदेशाः यदा कश्चिदपि सः प्राप्नोति, पश्यति, शृणोति, तस्य पालनं सः सर्वभावेन करोति ।

एतानि पूर्वोक्तानि सन्ति काव्यस्य षट् प्रयोजनानि इत्येषां षट् प्रयोजनानां प्राप्तये मानवद्वारा काव्यनिषेवणं कर्तव्यमेव । आचार्य मम्मटस्य एतानि काव्यप्रयोजनानि यथा तत् काले आसन् तथैव इदानीमपि श्रेयानि अनुकरणीयानि च विद्यते ।)435

34 5 30

32.5

(१६८ व्याख्या)

प्र० ४. — शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

कारिका इयं व्याख्येया ।

प्र० काव्यस्य हेतुः अथवा हेतवः इति मम्मट मतेन स्पष्टीकुरुत ।

प्र० काव्यस्य किं कारणं इति मम्मट निर्देशानुसारेण उल्लेखनीयं

उत्तरम् :- काव्ये शास्त्रे सर्वे लक्षण ग्रन्थकाराः काव्यस्य कारणं निष्पादितवन्तः । स्पष्टमपि अस्ति यत् कारणं विना कार्योत्पत्तिः न जायते । अस्मिन् प्रसङ्गे विशेषरूपेण विश्वनाथप्रमुखस्य आचार्य मम्मटस्य इति मत द्वयस्य उल्लेखं परवर्तिनः आचार्याः कृतवा विहितवन्तः ।

आचार्यः विश्वनाथः काव्य शास्त्रस्य प्रतिभा, ज्ञानं तथा च अभ्यासः इति त्रीणि कारणानि स्वीकरोति । परन्तु आचार्यः विश्वनाथः यत्र इत्येषां कारणानां पृथक्-2 स्वीकरोति तत्र परन्तु आचार्यः मम्मटः एतेषां कारणानां ~~मिलित रूपेण~~ समष्टि रूपेण समर्थकः अस्ति । तानि कारणानि पृथक्-2 रूपेण दर्शनीयानि सन्ति । यथा :-

(सम्मिलित रूपेण)

(1) शक्तिः = स्वाभाविकी

काव्य हेतु परम्परायां अस्याः प्रथमं स्थानं अस्ति । मम्मटस्य विचारानुसारेण बीजरूपा इयं शक्तिः संस्कार-विशेषः अस्ति । शक्तिः इयं मानवे स्वाभाविकी अस्ति । अस्याः एव कारणेन कविहृदये कविताभावः ~~उत्पन्नः~~ उद्भवः भवति । इयं दिव्य-दृष्टि तथा च विलक्षणा अस्ति । शक्तिं विना कोऽपि काव्यं कर्तुं न शक्नोति । कथञ्चित् यदि करोति तर्हि तत् काव्यं उपहासस्य पात्रं भवति ।

न कोऽपि सहृदयः जनः तस्य काव्यस्य सम्मानं करोति ।

२ निपुणता :-

निपुणता शब्दस्य अर्थः आचार्यः व्युत्पत्तिः करोति । सा निपुणता लोकवृत्तस्य शास्त्रस्य काव्यादीनाम्च अनुशीलनेन निरीक्षणेन च प्राप्यते । अयमपि काव्यनिर्माणस्य अथवा उत्कर्षस्य हेतुः अस्ति । वस्तूनां विषये सम्यक् ज्ञानं एव व्युत्पत्तिः अस्ति । छन्दशास्त्रस्य व्याकरणशास्त्रस्य शब्दकोशस्य, प्रकृत्यादीनां चतुःषष्टिः कलानां मनुस्मृत्यादीनां, धर्मशास्त्राणां, कौटिल्यादीनां अर्थशास्त्राणां वात्स्यायनस्य कामशास्त्रस्य, पशु-पक्षी-सम्बन्धि-ग्रन्थानां अनुशीलनेन विद्यायाः तथा च पाण्डित्यस्य प्राप्तिः भवति । यस्य कवेः एतादृशेषु शास्त्रेषु निपुणता नास्ति सः कथमपि उत्तमकाव्यस्य तु किं कथन सामान्य — काव्यस्यापि रचनां कर्तुं न प्रभवति । अतः काव्याय निपुणता अपि अत्यावश्यकं भवति ।

३ अभ्यासः :-

काव्यज्ञेभ्यः जनेभ्यः प्राप्तशिक्षया अभ्यासः अपि काव्य निर्माणस्य हेतुः अस्ति । ये जनाः काव्यं कर्तुं समर्थाः सन्ति अथवा नीरक्षीरविवेकिनः सक्षमाः सन्ति एतादृशेभ्यः जनेभ्यः निर्देशं प्राप्य प्रतिभावान् कविः पुनः पुनः काव्य निर्माणं करोति ।

आचार्यः मम्मटः काव्यस्य हेतुः इति मतस्य समर्थकः अस्ति । तस्य कथनमस्ति यत् शक्तिः, निपुणता तथा च अभ्यासः एते सर्वे मिलित्वा काव्य निर्माणस्य उत्कर्षस्य

च हेतुरस्ति । एतत् कारणत्रयं परस्परं सापेक्षं मिलित्वा काव्यहेतुः अस्ति । अत एव स्वयं आचार्य कारिकायां व्याख्यायां हेतुः न तु हेतवः इति मतस्य उल्लेखं अकरोत् । अतः पूर्वोक्तानां कारणानां सम्मिलित स्वरूपमेव काव्यस्य तथैव हेतुः अस्ति यथा अस्माकं शरीरस्य भिन्नानि अङ्गानि शरीर-रूपं ~~धायन्ति~~ । → धारयन्ति

प्रश्न — काव्यस्य किं स्वरूपं इति मम्मट मतेन उल्लेखनीयम्

उत्तर :- आचार्यः मम्मटः काव्यस्य स्वरूपं निम्नलिखितायां कारिकायां स्पष्टं करोति यथा —

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"

अत्र अस्यां कारिकायां आचार्यमम्मटः शब्दार्थौ, अदोषौ, सगुणौ तथा च अनलङ्कृती पुनः क्वापि, इति चतुर्विधानां विशेषणानां उल्लेखं करोति । यथा शब्दार्थौ

(1) शब्दार्थौ :- [न तु मुख्यतः अपितु उपचारतः]

मम्मट मतेन शब्दाः तथा च अर्थाः मिलित्वा काव्यं भवति प्राचीन- आलोचकानां इयं मान्यता अस्ति । "काव्यस्य शब्दार्थौ शरीरम्" काव्यं श्रुतं काव्यं पठितं एवं काव्यं कुशलम् इत्यादि व्यवहारेण शब्दार्थ युगलमेव काव्यं भवति ।

अदोषौ :-

अदोषौ इति शब्द- शब्दार्थयोः विशेषणमस्ति । दोष-रहितः शब्दार्थयुगलः एव काव्य शब्दस्याधिकारी अस्ति यथा मानव शरीरे अन्धत्वं, काणत्वं, पङ्गुत्वं, खञ्जत्वं

अत्यधिका

इत्यादय: दोषा: सन्ति तथैव परन्तु विद्वोग्य: काव्यदोषत्वम्।
यदि कोऽपि दोष: काव्ये आगच्छति तदा तत् काव्यं दुष्टं
काव्यं भवति । यद्यपि ~~दोषरहितं~~ दोषरहितस्य काव्यस्य
सम्भावना ~~अत्यधिका~~ नास्ति । परन्तु अदोषौ इति
शब्दस्य अत्र अयं अभिप्राय: यत् "कीटानुविद्धरत्नं इव"
दोषयुक्तं काव्यं काव्यमस्ति ।

3 सगुणौ :

इयं सगुणताऽपि शब्दार्थ-युगलस्य विशेषतास्ति । माधुर्यं ओज: तथा च प्रसाद: एतै: गुणै: संयुक्त: दोषरहित: शब्दार्थ-युगल: ~~इति~~ काव्यमस्ति । यत्र गुणस्य अथवा गुणानां अभावमस्ति तत्र कथञ्चिदपि काव्यस्य सम्भावना नास्ति । अत: गुणा: काव्ये अनिवार्यरूपेण भवन्ति । क्वचित् माधुर्यस्य आधिक्यं क्वचित् च ओजोगुणस्य प्राधान्यं तथा च क्वचित् प्रसाद गुणस्य प्राबल्यं दृश्यते । अत: सगुणौ इति शब्द: शब्दार्थौ इति शब्दस्य इति विशेषतया ~~प्राधान्यं~~ दृश्यते ।

4 अनलङ्कृती पुन: क्वापि :

इयं काव्यस्य चतुर्थी विशेषता अनलङ्कृती इति शब्दे ईषद्-अर्थे नञ् समासस्य प्रयोगेण अत्र अलङ्कारस्य अल्पता अथवा अस्पष्टता अपि गृहीता अस्ति । यदि काव्ये दोषाणां अभाव: गुणानां उपस्थिति, यथास्थानं अलङ्काराणां प्रयोग: सफलरूपेण अस्ति । तदा तादृश्यां अवस्थायां अलङ्काराणामनिवार्यता नास्ति । अलङ्कारा: स्पष्टं सन्ति अथवा न, रसज्ञ

यदि विद्यमानता अस्ति तदा तादृशः प्रयोगः उत्तमं काव्यं भवितुं शक्नोति । यथा —

"निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ॥" इत्यादि

अस्मिन् उदाहरणे स्पष्टतया शृङ्गार-रसः तथा च व्यञ्जना प्रकटो परन्तु स्पष्टरूपेण कस्यापि अलंकारस्य उपस्थितिः नास्ति । तथापि इदं उत्तमकाव्यस्य उदाहरणं अस्ति । अतः काव्यस्वरूपे पूर्वोक्ताः चत्वारः वैशिष्ट्यप्रधानाः काव्यस्वरूपं स्पष्टयन्ति प्रकटयन्ति पुष्टयन्ति च ।

प्र० 3 काव्यस्य कति भेदाः मम्मट-मतेन प्रत्येकं सोदाहरणं स्पष्टनीयः? वा कतिविधं काव्यं प्रत्येकं निदर्शनानुसारं व्याख्येयम् ?

उत्तरम् :- आचार्यमम्मटः एतद् पूर्वम् काव्यस्वरूपं, प्रयोजनं च विशदीकृत्य सम्प्रति तद्भेदान् उपस्थापयति प्रायेण त्रिविधं काव्यं इति आचार्याः बहुमतेन मन्यन्ते तदेव मतं अवलम्ब्य आचार्यमम्मटः त्रिविधं काव्यं अथवा काव्यस्य त्रयः भेदाः इति स्पष्टं करोति । आचार्य प्रमाणयति मते ते काव्यभेदाः उत्तमः, मध्यमः तथा च अधमः इति भेदत्रयं विवरणमाहुः ।

(i) उत्तमकाव्यम् :-

उत्तमकाव्यस्य परिभाषां आचार्यः स्पष्टयति

कारिका → "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।"

अर्थात् यस्मिन् काव्ये मुख्यार्थस्य अपेक्षया प्रतीयमानस्य अर्थस्य अर्थात् व्यङ्ग्यार्थस्य चमत्कारः आधिक्येन

भवति । तेन व्यङ्ग्यार्थस्य अधिक चमत्कारेण तत् काव्यम् उत्तम काव्यम् कथ्यते । बुधाः अर्थात् काव्यमर्मज्ञाः इति मतं ध्वनि काव्यमपि प्रकटयन्ति शब्दान्तरेण उत्तमकाव्यमेव ध्वनि काव्यम्, ध्वनि काव्यमेव उत्तम काव्यम् ।

अस्मिन् भेदे यद्यपि वाच्यार्थस्य अपि उपस्थितिः भवति परन्तु व्यङ्ग्यार्थस्य प्रभावेण (वाच्य चमत्कृत) तस्य महत्वं तिरोहितं यथा —

1. निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो,
नेत्रे दूरमञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ।

अस्मिन् श्लोके चतुर्थ चरणे इतो वापीं स्नातुं गतासि न तु तस्य अधमस्य ("नायकस्य") समीपं अन्यस्य अर्थस्य प्रतीति अभिधया भवति । परन्तु वास्तविक अर्थः व्यञ्जनया अयं प्रतीयते यत् हे दूति त्वं तस्यैव अधमनायकस्य समीपे रन्तुं "रमणं कर्तुं" गतासि न तु वाप्यां स्नातुम् ।

2 मध्यमकाव्यम् :-

मध्यम काव्यस्य लक्षणं आचार्यैः अनेन प्रकारेण सम्पादयति । कारिका "अतादृशि गुणीभूतव्यङ्ग्यं तु मध्यमम्" अर्थात् यत्र व्यङ्ग्यार्थो तु भवति परन्तु वाच्यार्थस्य अपेक्षया विशेषरूपेण चमत्कारो न भवति अर्थात् अस्मिन् भेदे व्यङ्ग्यार्थः वाच्यार्थं न प्रभावयति । अन्यैः आचार्यैः अस्य भेदस्य उल्लेखः

[illegible]

गुणीभूत व्यङ्ग्यरूपेण ख्यातमस्ति अर्थात् अनयोः कोऽपि गुणीभूत व्यङ्ग्य काव्यमस्ति। चमत्कार संयुक्त अत्र व्यङ्ग्यार्थस्य अपेक्षया वाच्यार्थस्य उपरि याति। भवति यथा –

"ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥"

अस्मिन् उदाहरणे वञ्जुललतागृहे दत्तसङ्केता नायिका आगता ~~[illegible]~~ इति व्यङ्ग्यं। गुणीभूतस्य अपेक्षया वाच्यार्थस्य चमत्कारः आधिक्येन दृश्यते। शब्दान्तरैः इदमपि कथयितुं शक्यते यद् अस्मिन् यद् वाच्यार्थः प्रधानः तथा च व्यङ्ग्यार्थः गौणोऽस्ति।

3 अधम काव्यम् :–

अधमकाव्यम् निम्न काव्यं भवति। अस्य परिभाषा आचार्येण अनेन प्रकारेण दर्शितास्ति।

व्यतिरेका = "शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्॥"

अर्थात् अस्मिन् उदाहरणे शब्दानां वाक्यानां च केवलं चमत्कारः भवति। व्यङ्ग्यस्य अत्र सर्वथा अभावः दृश्यते। अवरं काव्यमपि कथ्यते। आग्रहस्य कारणेन अनुप्रासस्य कारणेन अथवा शब्दचमत्कार दर्शनेच्छया स्वल्पशानां शब्दाडम्बराणां प्रयोगः क्रियते। यथा –

"स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्॥"

अतः एतैः त्रिभिः भेदैः काव्यस्य गणना आचार्येण कारितास्ति।
मुख्य रूपेण कविः उत्तमकाव्यस्य, अथवा मध्यम काव्यस्यैव
प्रयोगं करोति न तु अधमकाव्यस्य, यतः अधम काव्यं
नवाचारादपि सम्मानं न लभते।

① ॥ "अथ द्वितीय उल्लासः" 9Nine प्रश्नाः

प्र०६ कतिविधाः शब्दाः आचार्यमतेन दर्शनीयम्?

उत्तर: आचार्यमम्मटस्य परिभाषायां शब्दार्थौ इति शब्दस्य प्रयोगम्
अकरोत्। शब्दः तथा च अर्थः काव्यस्य शरीरं इति
आचार्येण एव स्वीकृतमस्ति। अधुना आचार्यः शब्दस्य
व्याख्यां च परिभाषां करोति। आचार्यः त्रिविधानां शब्दानां
उल्लेखं करोति। शब्दस्य त्रयः भेदाः आचार्येण दर्शिताः
सन्ति। ते सन्ति निम्न-लिखिताः —

वाचकः शब्दः, लाक्षणिकः शब्दः, व्यञ्जकः शब्दः,
एतेषां शब्दानां अर्थाः अपि त्रिविधाः सन्ति।

वाचकशब्दः यस्य अर्थस्य प्रतीतिं भवति सः वाच्यार्थः,
लाक्षणिक शब्दानां माध्यमेन यः अर्थः प्रतीयते सः लक्ष्यार्थः,
व्यञ्जकः शब्दः यं अर्थं निष्पादयति सः व्यङ्ग्यार्थः।
अनेन प्रकारेण वाचक शब्दस्य वाच्यार्थः, लाक्षणिक
शब्दस्य लक्ष्यार्थः व्यञ्जक शब्दस्य व्यङ्ग्यार्थः।

अत्र वाचकशब्दः यस्याः शक्त्याः माध्यमेन अर्थं
बोधयन्ति सा शक्तिः अभिधा इति कथ्यते। यथा
शक्त्या माध्यमेन लाक्षणिक शब्दाः अर्थं द्योतयन्ति
सा शक्तिः लक्षणा कथ्यते। यस्याः माध्यमेन

व्यञ्जकशब्दाः व्यङ्ग्यार्थं द्योतयन्ति सा शक्तिः व्यञ्जना इति कथ्यते । अतः वाचकशब्दस्य वाच्यार्थं तस्य साहाय्यकः अभिधा, लाक्षणिक शब्दानां लक्ष्यार्थं शक्ति लक्षणा, व्यञ्जक-शब्दानां व्यङ्ग्यार्थं तथा च शक्ति व्यञ्जना एवमेव स्पष्टीयते ।

प्र० 4. तात्पर्यार्थोऽपि केषुचित् ?

उत्तर: आचार्य मम्मटः त्रिविधानां शब्दानां त्रिविधा एव शक्ति इति स्पष्टं करोति परन्तु मीमांसादर्शनस्यानुयायि आचार्य कुमारिल भट्टः शब्दस्य एतत्त्रय अर्थस्य भिन्न अर्थः इति स्पष्टं करोति । तस्य कथनमस्ति यत् एते शब्दानां अपेक्षया एकः भिन्न अर्थः अपि अस्ति । तस्य नाम तात्पर्यार्थोऽस्ति । आचार्य स्पष्टयति यत् वाक्यार्थे बोधने आकाङ्क्षा, योग्यता तथा च सन्निधि इति त्रयाणां अपेक्षा भवति । तात्पर्यार्थोऽयं एतेषां सहयोगेन तात्पर्यार्थस्य अभावे अपेक्षितार्थस्य ज्ञानं करोति । सामान्यतया अभिधा, लक्षणा तथा च व्यञ्जना इति त्रयाणां कारणेन अर्थस्य प्रतीतिः भवति । किन्तु केवलं शब्दसमूहः सम्यक् अर्थस्य बोधने समर्थो न भवन्ति । शब्दस्य यः अर्थोऽस्ति तस्य स्पष्टीकरणे आकाङ्क्षा, योग्यता तथा च सन्निधिः इति एतेषामपि तत्र आवश्यकता भवति ।

परन्तु अस्य मतस्य समर्थनं परवर्तिभिः आचार्यैः सम्मानपूर्वकं केनापि न कृतमस्ति, यद् उल्लेखः किन्तु तेषां केवलं परम्परापरिपालनाय ।

प्रश्न 8) सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते - इयं कारिका व्याख्येया: वा
त्रिविधेषु अर्थेषु व्यङ्ग्यार्थस्य महत्त्वं प्रतिपादनीयं ।

उत्तर :- आनन्दवर्धनाचार्यः त्रिविधानां शब्दानां ~~तथा च लक्षणा कारिका~~ त्रिविधाः अर्थाः ~~उल्लेखं कुर्वन्ति~~ इति स्वीकरोति । अस्यां कारिकायां आचार्यः स्पष्टं करोति यत् वाच्यार्थ लक्ष्यार्थ तथा च व्यङ्ग्यार्थ क्रमशः व्यङ्ग्यार्थस्यैव सर्वत्र अपेक्षा दृश्यते अर्थात् वाच्यार्थोऽपि व्यङ्ग्यार्थः भवति, अनेन प्रकारेण लक्ष्यार्थोऽपि व्यङ्ग्यार्थस्य विद्यमानता दृश्यते व्यङ्ग्यार्थे तु व्यङ्ग्यार्थः भवति एव । सर्वेषु शब्देषु व्यञ्जकता अस्माभिः दृश्यते । या व्यञ्जकता शब्दे दृश्यते तस्य उपस्थितिः अर्थेऽपि एव । अनेन प्रकारेण त्रिविधेषु अर्थेषु कविः चमत्कारस्य आयोजनं तु करोति एव, सः चमत्कारः कवेः व्यञ्जकता अस्ति । व्यञ्जकता ~~सामर्थ्यं~~ यदि वाच्ये भवति तथा च लक्षणेषु ~~[illegible]~~ भेदं । अत एव आचार्येण कारिकायां प्रायशो इति शब्दस्य प्रयोगः कृतोऽस्ति । त्रिविधाः अर्थाः अन्यस्य अर्थस्य व्यञ्जकाः भवन्ति । यदा ते अन्यार्थम् अभिव्यञ्जयन्ति तदा ते स्वकीयं रूपमपि न त्यजन्ति - यथा -

" मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया ।
तद् भण किं करणीयमेवमेव न वासरः स्थायी ॥

अस्मिन् उदाहरणे काचित् स्वच्छन्दविहारिणी नायिका, इदं व्यञ्जयति, यत् गृहोपकरणानां माध्यमेन सा

① अभिधा वृत्ति → स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते

17 स इति साक्षात्सङ्केतित: अर्थात्

गृहात् बहिर्गन्तुम् इच्छति, तद् प्रयोजन तत्र विहर्तुम् इच्छति यत्र गमनस्य तस्यां इच्छा वर्तते ।

प्रश्न (5) के शब्दाः वाचकाः इति स्पष्टीयताम् ?

उत्तरम् वाच्यार्थस्य बोधकाः वाचकाः शब्दाः । शब्दस्य प्रयोगस्य प्राक्ज्ञानेन तद्विषये आचार्यस्य इयं परिभाषा अस्ति ।

कारिका "साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः"

अर्थात् : वक्ता यत् किञ्चिदपि वदति तत् सर्व किञ्चित् तस्य प्रत्यक्षं भवति । किञ्चिद् च परोक्षं [illegible] ज्ञानं तु सः शब्दानां माध्यमेन करोति परन्तु प्रत्यक्षं प्रति तस्य सङ्केतः भवति । अतः ये शब्दाः साक्षात् अर्थात् प्रत्यक्ष रूपेण सङ्केतितं अर्थं बोधयन्ति ते शब्दाः वाचकाः । वक्ता यद् वस्तूनां प्रत्यक्षं दर्शनं करोति तत् वस्तुप्रति तस्य अभिप्रायं सङ्केतोऽपि भवति । तेन सङ्केतस्य च अर्थः स्पष्टरूपेण ज्ञायते यथा कश्चिद् वदति - इयं गौः --- अस्मिन् उदाहरणे गौ शब्दं प्रति वक्ता संकेतं करोति संकेतद्वारा सः पशुः तस्य समक्षं आगच्छति यस्य ज्ञानं सः गौ रूपेण करोति ।

प्रश्न (6) संकेत कुत्र गृह्यते ?

उत्तरम् : वाचकशब्दानां सम्बन्धो आचार्यद्वारा इदं स्पष्टं ~~[illegible]~~ कृतमासीत् यत् संकेतितस्य अर्थस्य बोधकाः शब्दाः वाचकाः भवन्ति । अत्र अस्यां कारिकायां आचार्यः इदं स्पष्टं करोति यत् संकेतः कुत्र क्रियते अथवा कुत्र सम्पाद्यते तस्य सम्बन्धो स्वयं आचार्यः स्पष्टयति ।

चत्वारः

व्याख्या "संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा"

अर्थात् संकेतितस्य अर्थस्य चत्वारः भेदाः भवन्ति (अथवा चतुर्षु पदार्थेषु अर्थस्य उपस्थितिः दृश्यते) भवति

(1) जाति (2) गुणः (3) क्रिया (4) यदृच्छा।

(1) जातिः –

वस्तुतः संकेतः सर्वप्रथमं जातौ भवति यथा कश्चिद् वदति गाम् आनय। अनेन कथनेन श्रोता अनेकविधेषु पशुषु गां तस्याः जातिद्वारा एव अभिजानाति। ~~तत् पश्चात् किदृशी गौः अस्याः~~

(2) गुणः – कीदृशी

जाति पश्चात् किदृशी गौः अस्याः स्पष्टीकरणे शुक्लां गौः कपिलां गौः इत्यादि, अत्र प्रथमः संकेतः गोत्व जाति प्रति आसीत् तत्पश्चात् च तस्य शुक्लत्वं प्रति कपिलत्वं प्रति पुनः ~~दृश्यते~~ संकेतः दृश्यते अतः द्वितीयः संकेतः गुणं प्रति अस्ति।

3 क्रिया –

क्रिया शब्देन द्वयं साध्यावस्था यथा पचति गच्छति इत्यादीनि रूपाणि पश्यामः, द्वितीया च सिद्धावस्था – यथा – पच् धातु घञ् प्रत्ययद्वारा पाक इति शब्दस्य निष्पत्तिः भवति।

4 यदृच्छा –

ते शब्दाः यदृच्छाः भवन्ति ये इच्छानुसारेण व्यक्तेः नामानुसारेण प्रयुक्ताः भवन्ति। यथा कश्चिद् स्व पशोः अथवा बालकस्य इच्छानुसारेण

नाम करणं करोति, यदा कदा तेन [struck] नाम्ना सम्बो[illegible]
आचार्यमति च ।

प्रश्न (३) का नाम लक्षणा कुत्र च तस्य प्रयोगः । संक्षेपेण तस्य भेद
अपि निरूपणीया।

उत्तरम् : त्रिविधाः शब्दाः, त्रिविधाः च तेषां अर्थाः, त्रिविधाः च तेषां शक्तयः । वाचक शब्दः अभिधाद्वारा वाच्यार्थस्य प्रतीति भवति । लाक्षणिकशब्दानां लक्षणाद्वारा लक्ष्यार्थस्य ज्ञानम् । व्यञ्जकशब्दानां व्यञ्जनाद्वारा व्यङ्ग्यार्थस्य प्रतीतिः ।

अभिधायाः अनन्तरं आचार्यः कारिकायाम् आचार्यः लक्षणाया उल्लेखं करोति । आचार्यस्य मतानुसारेण लक्षणायाः लक्षणं "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया"

अर्थात् यत्र मुख्यार्थस्य अर्थात् वाच्यार्थस्य बाधा भवति अर्थात् यत्र अभिधाद्वारा अर्थस्य प्रतीतिः न भवति अ[illegible] अभिधा शक्ति सक्रियम् अपेक्षितं अर्थं कथयित्वा विरता भवति तत्र अर्थस्य ज्ञानाय मुख्यार्थेन सह येन शक्त्या अर्थस्य प्रतीतिः भवति । [struck] सा शब्दस्य द्वि[illegible] लक्षणा नाम्नी शक्तिः अस्ति । इयं लक्षणा रूढिद्वारा प्रयोजनद्वारा च सर्वप्रथमं द्विविधा अस्ति । अन्य अर्थस्य काल्पनिक रूपेण तत्र प्रतीतिः क्रियते अत एव आचार्येण आरोपिता इति शब्दस्य प्रयोगः कृतोऽस्ति, अनेन आरो[illegible] इति शब्देन अभिधाशक्त्या अस्या भिन्नत्वं स्पष्टं भव[illegible]

यथा - "गङ्गायां घोषः"

अस्मिन् उदाहरणे गङ्गायां घोषः इति कथनेन गङ्गायां

प्रवाहे घोषः अर्थात् गृहं इति अर्थस्य प्रतीतिः भवति । परन्तु जलस्य प्रवाहे गृहस्य रचना सर्वथा असम्भवा अस्ति अनेन प्रकारेण अत्र अभिधाद्वारा वास्तविकस्य अर्थस्य प्रतीतिः न भवति । अधुना अर्थ-ज्ञानाय लक्षणा अपेक्षते लक्षणाद्वारा गङ्गायाँ इति शब्दस्य गङ्गातटः इति लक्ष्यार्थस्य प्रतीतिः भवति । स्पष्टं च भवति गङ्गायाँ घोषः अर्थात् गङ्गातटे घोषः । रूढि तथा च प्रयोजनं इति यदा कश्चिद् शब्दः कस्मिंश्चिदर्थे रूढः अर्थात् प्रसिद्धः भवति । यथा अस्मिन्नेव उदाहरणे गङ्गायाँ इति शब्दः गङ्गातटस्यार्थे रूढः अर्थात् प्रसिद्धः अस्ति । गङ्गातटे गृहनिर्माणस्य किं प्रयोजनं इदमपि स्पष्टमस्ति यत् गङ्गातटे जलप्रवाहेन शीतलता भवति ; निरन्तरं जलप्रवाहमानेन जलेन तत्र पावनता अपि दृश्यते ।

एवं लक्षणा सर्वप्रथमं द्विविधा भूत्वा अनेकेषु भेदेषु विभक्ता भवति । अनेन कारणेन लक्षणायाः सन्ति अनेके भेदाः । परन्तु मुख्य रूपेण आचार्याः षड्विधाः लक्षणाः इत्येवं स्वीकरोति ।

प्रश्न २ किं नाम व्यञ्जना कति च तस्याः भेदाः इति स्पष्टं क्रियताम् ?

उत्तर : त्रिविधानां शब्दानां त्रिविधाः शक्तयः इति पूर्वमेव स्पष्टं कृतमस्ति । लक्षणायाः पश्चात् व्यञ्जनायाः निरूपणं आचार्यद्वारा ~~कृतम्~~ । यथा : कृतमस्ति/

"यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

अन्यत;

लक्षणायाः निरूपणं यथा अभिधायाः अपेक्षा भवति तथैव व्यञ्जनायाः निरूपणे लक्षणायाः अपेक्षा दृश्यते। यथा प्रथमं अभिधाद्वारा अर्थ ज्ञानं भवति तत्पश्चात् लक्षणाद्वारा अनन्तरं च व्यञ्जना-द्वारा अर्थस्य प्रतीतिः क्रियते यथा गङ्गायां घोषः। अस्मिन् उदाहरणे तट रूपस्य अर्थस्य प्रतीतिः तु लक्षणाद्वारा भवति परन्तु शीतत्व पावनत्वं इत्यादि रूपाणां अर्थानां प्रतीतिः व्यञ्जनाद्वारा एव सम्भवा भवति। इयं व्यञ्जना मुख्यतया शाब्दी व्यञ्जना तथा च आर्थी व्यञ्जना इति द्विविधा अस्ति शब्देषु व्यञ्जनायाः ग्रहणे शाब्दी-व्यञ्जना, अर्थेषु व्यञ्जनायाः ग्रहणे आर्थी व्यञ्जना अस्ति। पुनश्च इयं शाब्दी व्यञ्जना अभिधा मूला तथा च लक्षणा मूला इति द्विविधा अस्ति।

प्र० २ लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः॥

उत्तर- अस्यां कारिकायां आचार्यमम्मटः स्पष्टं करोति यत् लक्ष्य अर्थात् तटादि मुख्यार्थः न भवति तथा च अर्थस्यापि बाधा न भवति। तेनैव प्रकारेण तटादीनां अर्थानां फलेन सह साक्षात् सम्बन्धः न भवति। तथा च शीतत्वादीनां प्रयोजनस्य लक्षणानां यत् अन्यत् प्रयोजनमपि न भवति तत्र गङ्गादयः शब्दाः अक्षमाः अर्थात् अर्थ प्रतिपादने योग्याः न भवन्ति। यथा गङ्गा शब्द प्रवाहरूपे अर्थे बाधिते सति लक्षणाद्वारा तटरूपस्य अर्थस्य बोधं कारयति। किन्तु तट मुख्यार्थः नास्ति तटरूपे अर्थे बाधा नास्ति,

संयोगो विप्रयोगश्च साहचर्यं विरोधिता
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।
22 सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

गङ्गा शब्दस्य अर्थं तटस्य पावनादिकथं लक्ष्यार्थभूतः सम्बन्धः अपि नास्ति, प्रयोजनं लक्ष्यं स्वीकरणे अन्यं किमपि प्रयोजनं नास्ति यथा गङ्गा शब्दः तट-रूपस्य अर्थस्य प्रतिपादने असमर्थः अस्ति, तथा च प्रयोजनस्य प्रतिपादने अपि असमर्थो नास्ति ।

(६) प्र० अभिधा मूला व्यञ्जनायाः स्वरूपं प्रतिपाद्य तद् भेदान् सोदाहरणं स्पष्टं क्रियताम् । (याद नहीं [illegible])

उत्तर :- आचार्यः मम्मटः व्यञ्जनायाः प्रसङ्गे इदं पूर्वमेव स्पष्टं अकरोत् यत् व्यञ्जना मुख्यतया शाब्दी व्यञ्जना तथा च आर्थी व्यञ्जना इति द्विधा अस्ति । पुनश्च सा शाब्दी व्यञ्जना अभिधा मूला तथा च लक्षणा मूला इति द्वाभ्यां भेदाभ्यां विभक्ता अस्ति । प्रश्नानुसारेण अत्र अभिधा-मूला-व्यञ्जना विवेचनीया अस्ति । तस्याः लक्षणं आचार्यः स्पष्टं करोति —

" अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥

अत्र अनेकार्थानां शब्दानां एकस्मिन् अर्थे नियन्त्रणस्य आवश्यकता भवति तत्र ते अनेकार्थकाः शब्दाः संयोगादीनां शब्दानां माध्यमेन एकस्मिन् अर्थे नियन्त्रिता भवन्ति । संयोगादयः शब्दाः निम्न प्रकारेण सन्ति ।

(1) संयोग :-

संयोगस्य तात्पर्यमस्ति प्रसिद्धसम्बन्धः, अयं संयोगः वाच्यकतायाः नियामकः अस्ति । यथा " सशङ्खचक्रो हरिः

अत्र हरिः शब्दः अनेकार्थकः अस्ति परन्तु शङ्खचक्रयोः संयोगेन अत्र हरिः शब्दः विष्णु वाचके निर्धारितोऽस्ति ।

2 विप्रयोगः ÷ ~~कोऽभिप्रायोऽस्ति~~

विप्रयोगेन ~~सम्बन्धोऽस्ति~~ विभागः अथवा प्रसिद्ध सम्बन्धस्याभावः । संयोगेन एव वियोगः भवति अतः ÷

" अशङ्खचक्रो हरिः " शंखस्य चक्रस्य च संयोगः यथा विष्णुना सह अस्ति । तथैव वियोगेऽपि तेनैव सह, अतः पुनः हरिशब्दः विष्णुः वाचकः ।

3 साहचर्यः ÷

एकस्मिन् कार्ये सह निवासः स्वामी सेवक सम्बन्धः वा सेवक केनापि रूपेण ~~कालरूपेण, बन्धुरूपेण, केनापि रूपेण~~ सम्भवः ~~अस्ति~~ भवति । यथा —

राम लक्ष्मणौ —

यद्यपि राम शब्दः अनेकार्थकः अस्ति, परन्तु लक्ष्मणस्य साहचर्येण राम-शब्दः दशरथ पुत्र रामस्य वाचक अस्ति ।

4 विरोधिता ÷

विरोधिता शब्दस्य अर्थः वैरभावः अस्ति । अस्ति-यथा —

"रामार्जुनौ" अत्र विरोधस्य कारणेन रामशब्दः परशुरामवाचकः तथा च अर्जुनः कार्तवीर्यस्य वाचकोऽस्ति । अनयोः द्वयोः वैरभावः इतिहास पुराणेषु प्रसिद्ध एव ।

"रामार्जुनगतिस्तयोः"

5 अर्थः ÷

अर्थस्य तात्पर्यं भवति एतादृशी स्थिति यत् अन्य प्रकारेण सामर्थ्यं न स्यात् । यथा " स्थाणुं भज भवच्छिदे

यद्यपि स्थाणुः शब्दः अनेकार्थकोऽस्ति परन्तु भव-व्याधा-हरणाय अत्र स्थाणुशब्दः शिवस्य अर्थे गृहीतोऽस्ति ।

6 प्रकरणम्

प्रकरणम् अर्थोऽस्ति, वक्तुः श्रोतुश्च बुद्धौ कस्यचित् विचारः :- यथा — सर्वं जानाति देवः, यद्यपि देव शब्दः अनेकेषु अर्थेषु प्रयुक्तः भवति । परन्तु प्रत्यक्षं सम्बोधनेन देव शब्दः भवान् इति युष्मद् अर्थे प्रयुक्तोऽस्ति ।

7 लिङ्गम् :-

लिङ्गस्यार्थः संयोगेन भिन्नसम्बन्धद्वारा द्वितीयस्य पदार्थस्य स्मारकः धर्मः । यथा —
"कुपितः मकरध्वजः" यद्यपि मकर शब्दः अनेकार्थेषु गृह्यते परन्तु मकरध्वजः यस्य सः मकरध्वजः । कोपेन अर्थेन मकरध्वजशब्दः कामदेवस्य वाचकोऽस्ति ।

8 अन्य शब्दस्य सन्निधिः :-

यत्र अनेकार्थकेन शब्देन सह नियतार्थ-सूचकः शब्दः प्रयुक्तो भवति तत्र एतादृशः प्रयोगः सन्निधिः दृश्यते । यथा — "देवस्य पुरारातेः" इत्यत्र देव शब्दः अनेकार्थकः परन्तु त्रिपुरस्य अरातिः अर्थात् शत्रुः शत्रुरूपेण देव-शब्दः शिवस्य वाचकः ।

9 सामर्थ्यम् :-

सामर्थ्यं शब्दस्य अर्थोऽस्ति कारणता अथवा शक्तिः यथा :— "मधुना मत्तः (पिकः) कोकिलः" मधु शब्दः
10 वसन्तस्य, मकरन्दस्य, मद्यस्य इत्यादिषु अर्थेषु प्रयुक्तः भवति परन्तु मादकतायाः सामर्थ्यस्य कारणेन

वसन्त

~~[illegible]~~ ऋतुर्वाच्योऽस्ति ।

10 औचिती :

औचितीशब्दस्य अर्थोऽस्ति - उचिता अथवा योग्यता । यथा : "पातु वो दयितामुखम्" इत्यादि "मुखं" इति शब्दः अनेकार्थः परन्तु प्रियतमायाः अथवा दयितायाः अनुकूलतया कारणेन मुखं इति शब्दः नायिकायाः अर्थात् [illegible] वाच्योऽस्ति ।

11 देशः :

~~[illegible]~~ देश शब्दः नगरस्य ग्रामस्य जनपदस्यार्थे बोधकोऽस्ति । यथा - "भात्यत्र परमेश्वरः" अस्मिन् वाक्ये परमेश्वररूपकः अनेकार्थः शब्दः नृपस्य बोधकोऽस्ति ।

12 कालः :

कालेन अत्र शब्दस्य विशिष्टस्य अर्थग्रहणं भवति यथा - "चित्रभानुर्विभाति" अत्र चित्रभानु शब्दः सूर्यादीनां अनेकार्थानां वाच्योऽस्ति परन्तु दिने यदि भानुशब्दस्य प्रयोगः क्रियते तर्हि सूर्यः रात्रौ च अग्निर्वाच्योऽस्ति ।

13 व्यक्तिः :

व्यक्तिशब्देन अत्र पुल्लिङ्ग स्त्रीलिङ्ग इत्यादीनां निर्धारणमस्ति । यथा - "मित्रं भाति" "मित्र" शब्दः अत्र सुहृदस्य ~~[illegible]~~ बोधकोऽस्ति । यदि "मित्रो भाति" स्यात् तदा सूर्यस्य बोधको भविष्यति । ~~[illegible]~~

14 स्वरः :

स्वरशब्देन अत्र उदात्तः अनुदात्तः तथा च स्वरित इति त्रिविधाः स्वराः अपेक्षिताः सन्ति । परन्तु स्वराणां

गणना केवलं वेदेषु एव क्रियते न तु लौकिक साहित्ये ।
अनेन कारणेन काव्ये तस्य उल्लेखः अपेक्षितः नास्ति ।
अनेन प्रकारेण अभिधा मूला व्यञ्जना एतैः निश्चितैः
शब्दैः अपेक्षितैः ~~नास्ति~~ अथवा अनभिमतं जायते भवति
एतेषां अनपेक्षा किन्तु अनभिमतैः अर्थैः कथाचित्यदपि सम्भावना
नास्ति ।

III "अथ तृतीयः उल्लासः"

प्रश्न — आर्थी व्यञ्जनायाः किं स्वरूपम् ?

उत्तरम् — शाब्दी व्यञ्जनायाः विवेचनं कृत्वा आचार्यः आर्थी
व्यञ्जनायाः उल्लेखं करोति, आर्थी व्यञ्जनायाः स्वरूपं
आचार्यः अनेन प्रकारेण प्रतिपादयति —

"~~प्रस्ताव~~

"वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥

या व्यञ्जना अत्र निर्धारिता भवति सा आर्थी व्यञ्जना
रूपेण निरूपिता अस्ति । आर्थी व्यञ्जनायाः सम्बन्धे
आचार्यः कथयति — वक्ता, बोद्धव्यः, काकुः, भिन्नवाचित —
सन्निधि, प्रकरणं, देशः, कालः इत्यादयः । विशिष्टतया अर्थानां
विशिष्टता कारणेन प्रतिभायुक्तानां सहृदयजनानां अन्यस्य
अर्थस्य प्रतीतिः ~~हेतुरूपः व्यापारः अस्ति~~ भवति

97 एवं हेतु स्पार्थस्य

सा व्यापार-भूतत्व व्यञ्जना एव आर्थी व्यञ्जना भवति।

(1) वक्ता :

यत्र वक्तुः वैशिष्ट्येन चौरस्येण (?) व्यंग्यार्थस्य निर्धारणं भवति तत्र अयं भेदः। यथा –

"अतिपृथुलं जलकुम्भं गृहीत्वा समागताऽस्मि सखि त्वरितम्। श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम्॥"

अस्मिन् उदाहरणे नायकेन सह रमणं कृत्वा, श्रान्ता क्लान्ता नायिका स्वकीयं रतिभावं अजलानयनेन (?) तिरोहति। तस्य कथनमस्ति यत् सा विशालं जलकुम्भं शिरसि धारयित्वा त्वरितं गत्वा समागता अस्ति। अनेन सा क्षणं विश्रामं कर्तुं इच्छति।

2 बोद्धव्यः :

यत्र बोद्धव्यवैशिष्ट्येन दूत्याः नायकद्वारा उपभोगः व्यज्यते भवति यथा –

औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम्। मम मन्दभागिन्याः कृते सखि त्वामपि अहह! परिभवति॥

नायकेन सह रतिक्रीडां कृत्वा आगतां दूतीं विलोक्य नायिका तां सम्बोधयति। अत्र नायिका त्वत्पतिद्वारा दूत्या उपभोगं व्यञ्जनया स्पष्टयति।

3 काकु :

यत्र काकु अर्थात् कण्ठध्वनिविशेषः ध्वनिद्वारा भिन्नार्थस्य प्रतीतिः भवति, यथा –

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।

विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

अस्मिन् उदाहरणे वृकोदरः (भीमः) स्वबान्धवान् सम्बोधयति काकुद्वारा च इदं व्यक्तं करोति यत् ज्येष्ठ भ्रातुः मां प्रति खेदः ~~सा क्रोधः~~ सर्वथा अनुचितः अस्ति। यः खेदः अथवा क्रोधः तेन ~~मयि~~ प्रति क्रियते सः वस्तुतः कौरवेषु एव करणीयः आसीत् यतः कौरवाणां कारणेन एव अस्माकम् एतादृशी च नीचतमा स्थितिः सञ्जाता । मान

५ वाच्य :-

यत्र ~~[illegible]~~ वाक्य वैशिष्ट्येन भिन्नार्थस्य एव अर्थस्य प्रतीतिं करोति यथा :-

तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषिरन्यत्र ।
इदानीं सैवाहं तौ च कपोलौ न च सा दृष्टिः ॥

अर्थात् अत्र नायिका एतद् वक्तुम् इच्छति यत् मम कपोलप्रतिबिम्बितां दृष्ट्वा तव (नायकस्य) दृष्टिः भिन्ना एव आसीत् परन्तु इदानीं सा अत्र नास्ति अनेन कारणेन तव दृष्टौ भेदः सञ्जातः । अत्र नायकस्य प्रच्छन्ना कामुकता नायिकाद्वारा व्यक्ता क्रियते ।

६ वाच्य :-

वाच्ये अस्मिन् भेदे वाच्यवैशिष्ट्येन भिन्नस्य एव अर्थस्य प्रतीतिः भवति । यथा :-

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ॥
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाताः

येषामत्र सरति कलित काण्डकोपो मनोभूः ॥

अत्र कूलान्यपि तृणवन्ति नर्मदा नद्याः एकान्तस्य रमणीयस्य च स्थानस्य उल्लेखोऽस्ति । अतः अयं प्रदेशः सुरत क्रीडायै सर्वथा उपयुक्ता अस्ति । अतः तत्र गत्वा त्वया सुरत क्रीडा कर्तव्या ।

6 अन्य सन्निधिः :

अस्मिन् भेदे अन्य सन्निधिः अन्य जनस्य सामीप्यकारण (व्यञ्जनया) भिन्नत्या एव अर्थस्य प्रतीतिः कारणमस्ति । यथा—

“ नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः ॥

अस्मिन् उदाहरणे नायिका दूतीं सम्बोधयति, मम श्वश्रूः नवान्तादिनं गृहकार्येषु एव माम् नियोजयति केवलं सन्ध्या समये एव अवकाशः भवति अत्र व्यञ्जनाद्वारा अन्यस्य अर्थस्य प्रतीतिः अत्र भवति । यत् केवलं सायंकाले एव नायिका उपपतिः समीपे गन्तुं शक्नोति । स एव कालः तेन सह सुरतस्य योग्यः भवति ।

7 प्रस्तावः :

प्रस्तावस्य अर्थात् प्रकरण वैशिष्ट्यस्य कारणेन यत्र भिन्नार्थस्य प्रतीतिः भवति ।

यथा : श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम् ॥

अत्र उपपतिः समीपे गन्तुं नायिकां कश्चिद् सम्बोधयति यत् त्वया अद्य तत्र गमनीयम् यतः तव भर्ता अद्य कस्मिंश्चिद् समये आगन्तुं शक्नोति ।

8 देशः :

देशः अर्थात् स्थानम्, वैशिष्ट्येन यत्र भिन्नस्य अर्थस्य प्रतीतिः भवति तत्र अयं भेदः । यथा :

"अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ।"

अत्र यत्र नायिका अस्ति तस्मिन् स्थाने तस्याः उपपतिः आगमिष्यति । अतः तत् स्थानं सा सर्वथा निर्विघ्नं कर्तुम् इच्छति । अनेन कारणेन सा अन्य सखीजनान् तस्मात् स्थानात् व्याजेन दूरी कर्तुम् इच्छति ।

9. कालः :

यत्र काल वैशिष्ट्येन भिन्नस्य एव अर्थस्य प्रतीतिः भवति यथा :

गुरुजन-परवश प्रिय, किं भणामि तव मन्दभागिन्यहम् ।
अद्य प्रवासं व्रजसि व्रज त्वमेव श्रोष्यसि करणीयम् ॥

अस्मिन् उदाहरणे मधुमासे नायकः नायिकां गृहे त्यक्त्वा परदेशं गन्तुं उद्यतोऽस्ति । नायिका तं कथयति यत् त्वं मातुः पितुः आदेशेन इदानीं मधुसमये देशान्तरं गन्तुं उद्यतोऽसि तर्हि गच्छ तव गमनान्तरं अहं किं करिष्यामि तत् तु त्वं स्वयमेव श्रोष्यसि । अर्थात् नायकस्य वियोगेन नायिका प्राणोत्सर्गं करिष्यति ।

कालमेव व्यञ्जना अर्थः अत्र दृश्यते / 73

31

प्र० 16 शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥

उत्तरम् :- आचार्यः मम्मटः अस्यां कारिकायां आर्थीव्यञ्जनायां शब्दस्य सहकारितां प्रकटयति, यतः अर्थः शब्दानुगामी भवति अतः अर्थस्य आर्थीव्यञ्जनाय शब्दस्यापि अपेक्षा भवति यद्यपि आर्थी व्यञ्जनायां वाच्यादि अर्था एव अन्यार्थस्य व्यञ्जकाः भवति। परन्तु शब्दस्यापि तत्र अपेक्षा भवति। यतः मम्मटस्य कथनानुसारेण एव शब्दार्थौ युगलं काव्यमस्ति। यथा शब्दः तथा च अर्थः विशेषस्य अर्थस्य प्रतीतिं कारयतः। तदा एव काव्यं ध्वनिकाव्यं (उत्तमकाव्यं) भवति। अनेन एव कारणेन आचार्यः स्पष्टं करोति। यत् अर्थस्य व्यञ्जकतायां शब्दोऽपि समान-भावेन सहायकः भवति। यतः काव्ये विविधाः अर्थाः विविधानां शब्दानां माध्यमेन एव ज्ञेयाः अथवा ज्ञातुं योग्याः भवन्ति। इदं तु शब्द प्रमाणेन एव प्रमाणितं भवति। ~~इदं तु शब्द प्रमाणेन एव~~ प्रत्यक्षादीनां प्रमाणानां एतदर्थं आवश्यकता नास्ति। कदाचित् शब्दः अर्थस्य सहायकः, कदाचित् अर्थः शब्दस्य सहायकः अतः समानभावेन द्वयोः आवश्यकता दृश्यते।

प्र० 17

सहायक। सहायकः

अथ सप्तम उल्लास:

प्रश्न: काव्ये दोषाणां किं स्थानं कथं ते काव्यं दूषयन्ति, आचार्य मम्मटेन कतिविधा: दोषा: प्रगणिता: सोदाहरणं इति लिख्यताम् ?

उत्तर: वाक्यं रसात्मकं काव्यं, इति आचार्य विश्वनाथस्य कथनमस्ति । आचार्य राजशेखर: काव्य-मीमांसायां काव्यस्य पुरुष रूपेण उल्लेखं करोति । काव्यं वै पुरुष: यथा मानव शरीरस्य विभिन्नानि अङ्गानि, इन्द्रियाणि च सम्मिलित रूपेण शरीर रूपं धारयन्ति तथैव काव्येऽपि शब्द:, अर्थ:, रस:, गुणा: तथा च अलंकारा: एते सर्वे अवयव रूपेण सन्ति । काव्यं मानव रचना अस्ति स्वयं च मानव: दोष युक्त: अस्ति अत: तेन रचितं काव्यं कस्यापि दोष रहितम् भवितुं न शक्नोति । दोषा: स्वाभाविक रूपेण दृष्टि-गोचरा: भवन्ति, स्वाभाविक च प्रासङ्गिक रूपेण । एतादृशी एव अवस्था (व्यवस्था) मानवशरीरस्य अस्ति । मानव: यदि केनापि अङ्गेन दूषित: भवति अर्थात् अङ्ग-भङ्ग भवति तदा सा अङ्ग-भङ्गता शरीरं दूषयति । तथा च तेन दोषेण अङ्गहीना: मानवा: कदाचिदपि समाजे गच्छन्ति तत्र ते उपहासस्य पात्राणि भवन्ति, एतादृशी एव काव्यस्य सम्बन्धे अस्ति । यदि कस्मिंश्चिद् काव्ये पञ्च विधेषु दोषेषु कोऽपि दोष: समागच्छति तर्हि तस्य काव्यं दूषितं भवति । दूषितं काव्यं विदुषां समाजे श्लाघायोग्यं पात्रं न भवति, यथा मानव शरीरे नेत्रस्य, कर्णस्य, श्रोत्रस्य हस्तपादानां मध्ये कस्यापि भङ्गतया दूषयन्ति तथैव [illegible]

काव्यमपि शब्दस्य (पदस्य), पदांशस्य, वाक्यस्य, अर्थस्य च तथा च रसस्य दोषेण दूषितं भवति। अतः ~~आलोचनाया:~~ आलोचकानाम् भयात् कविः यथा सम्भवं स्वकीये काव्ये दोषाणां निराकरणं करोति, तथापि निर्दुष्टता काव्ये सरलतया स्थापिता नास्ति।

आचार्यमम्मटेन स्वकीये लक्षणग्रन्थे काव्यप्रकाशे पञ्चविधानां दोषाणां उल्लेखः कृतः अस्ति। ते सन्ति पददोषाः, पदांशदोषाः, वाक्यदोषाः, अर्थदोषाः, तथा च रसदोषाः।

प्र०१४ (6 P. 182) मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥

अथवा :- काव्ये दोषाणां स्वरूपं किम्? आचार्यमम्मटेन कतिविधा दोषाः प्रगणिता इति सोदाहरणं लिख्यताम्।

उत्तरम् :- अस्यां कारिकायां आचार्यः दोषाणां सामान्यस्वरूपं प्रतिपादयति दोषाः मुख्यार्थस्य काव्यस्य अपकर्षकाः भवन्ति। दोषद्वारा काव्यस्य तथा च मुख्यार्थस्य हतिः (हानिः) भवति। आचार्यः मम्मटोऽपि काव्यस्य स्वरूपे इदं स्वीकरोति। यत् काव्ये रसस्य एव मुख्यं स्थानं भवति, शब्दाः तथा च अर्थाः रसस्य उपकारकाः भवन्ति। अतः तयोः काव्ये अपेक्षा भवति। काव्ये शब्दद्वारा ज्ञेयः अर्थः अपि मुख्यः भवति। अतः रसस्य अर्थस्य च उपकारकाः शब्दाः भवन्ति, शब्दं विना अर्थस्य स्थापना नास्ति शब्दार्थयोः स्थाने रसस्य स्थितिः भवति। इति प्रत्यक्षरूपेण अस्यां कारिकायां आचार्यः दोषाणां भेदानामपि उल्लेखं करोति। शब्दस्य स्थाने

समुच्चयेन

काव्ये पद-शब्दस्य प्रयोगः भवति । अतः यः पदं "शब्दं" दूषयति सः पददोषः। पदस्य अनेके अंशाः भवन्ति । ये दोषाः पदांशं अथवा पदांशान् दूषयन्ति ते पदांशदोषाः । पदानां "शब्दानां" ~~समुच्चयेन~~ वाक्यं भवति, ये दोषाः काव्यस्य किमपि वाक्यं दूषयन्ति ते वाक्यदोषाः । शब्दानां वाक्यानाञ्च अनेके अर्थाः भवन्ति । ये दोषाः किमपि अर्थं दूषयन्ति ते अर्थदोषाः । रसः काव्यस्य आत्मा इति रूपान्तरेण आचार्यमम्मटोऽपि स्वीकरोति । आत्मारूपः रसः यदि केनापि कारणेन दूषितः भवति तदा ~~तदा दोषाः~~ ते रसदोषाः भवन्ति । यद्यपि गुणाः, अलंकाराः काव्यस्य उपयोगिनः सन्ति परन्तु गुणानां दोषाणां सम्भावना ~~नास्ति~~ न भवति । अलंकाराणां आवश्यकता तु काव्ये भवति परन्तु अलंकाराणां अनिवार्यता नास्ति । अतः काव्यस्य पञ्च एव पूर्वोक्तानि अङ्गानि दोषद्वारा दूषितानि भवन्ति । अतः पञ्चविधाः दोषाः एव आचार्य-द्वारा प्रकाशिताः सन्ति ।

तेषां पूर्वोक्तानां दोषाणां संक्षेपेण अत्र च अभ्यासिकः उल्लेखः क्रियते ।

(1) पददोषाः :-

यद्यपि आचार्यमम्मटेन एतेषां दोषाणां संख्या षोडश प्रणीताः अस्ति । परन्तु अत्र एकस्यैव उल्लेखः अस्ति ।

"श्रुतिकटुः" इति श्रवणे कर्णे प्रयुक्ताः ~~[illegible]~~ शब्दाः कटुं लगन्ति ते श्रुतिकटुदोषाः ।

"अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः । अत्र आदिमन्
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥

उदाहरणे कार्तार्थ्यम् ?? अयं शब्दः कृतार्थस्य वाचकः
स्यात् अस्ति । परन्तु शब्दोऽयं श्रुतिकटुः अस्ति अतः
अत्र पद दोषस्य उदाहरणम् ।

२ वाक्य दोषाः :-

वाक्यदोषे अनेके शब्दाः एतादृशाः भवन्ति ये श्रुतिकटुत्वं उत्पादयन्ति यथा :-

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनतार्प्सीत् सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ,
समूलघातं न्यवधीदरींश्च ॥

अस्मिन् उदाहरणे अध्यैष्ट, अयष्ट, व्यजेष्ट, इत्यादयः शब्दाः एतादृशाः सन्ति ये श्रवणे कटुत्वं उत्पादयन्ति । पद दोषवत् एते वाक्यदोषाः संख्यायां षोडश सन्ति ।

३ पदांश दोषाः :-

एतादृशाः दोषाः पदस्य अन्तर्गत शब्दस्य एकभागे दृश्यन्ते यथा :-

तद् गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरलभ्य एव ।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः ॥

अस्मिन् उदाहरणे कामदेवस्य उमा-शिवयोः मध्ये कामभावना जननाय यात्रा वर्णनं अस्ति । परन्तु प्रसिद्ध कविना कालिदासेन अपि अस्मिन् उदाहरणे सिद्ध्यै लब्ध्यै आदयः शब्दाः प्रयुक्ताः सन्ति तेन श्रुति कटुत्वं एव जायते ।

४ अर्थ दोषाः :-

अर्थ दोषाणां संख्या आचार्येण त्रयोविंशति प्रगणितास्ति

अत्र निरर्थता मात्रेण अपुष्टः । यथा :-

“अति विततगगनसरणिप्रसरणपरिमुक्तविश्रामानन्दः ।
मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति ॥”

अस्मिन् उदाहरणे 'दूरं' इति शब्दः / मरुदुल्लासितसौरभ्य अत्र पूर्णतया पुष्टं न करोति तेन च अर्थ ज्ञाने बाधा उत्पन्ना भवति ।

5 रसदोषाः :-

रसे विभावाः अनुभावाः व्यभिचारिभावाः तथा च स्थायिभावः एते चत्वारः भावाः भवन्ति । अतः एतेषां भावानां संयोगेन एव रसस्य अनुभूतिः भवति, ये दोषाः एतेषु भावेषु एकमपि भावं दूषयन्ति ते रसदोषरूपेण ज्ञायन्ते । आचार्य मम्मटेन एतेषां दोषाणां संख्या त्रयोदश इति स्वीकृता अस्ति । यथा

(1) व्यभिचारी भाव दोषः :-

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ॥

अस्मिन् उदाहरणे व्रीडा इत्यादि शब्देषु शब्दवाच्यत्व नामकः दोषः अस्ति । कविना अत्र व्यभिचारी इति शब्दस्य प्रयोगः करणीयः आसीत् । ~~संक्षेपेण~~

(संक्षेपेण पञ्च विधानां दोषाणां निदर्शनं कृतमस्ति)

अथ अष्टम उल्लासः —

प्रश्न — गुणस्य किं स्वरूपं कति च तस्य भेदाः? इति मम्मट मतेन प्रदर्शनीयम् ? वा

उत्तरम् — ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥ इमं कारिका व्याख्येया ?

उत्तरम् — आचार्यमम्मटोऽपि रसो काव्यस्य अङ्गी धर्म आत्मा स्वरूपं स्वीकरोति । सः स्पष्टं करोति यत् यथा मानव-शरीरस्य शौर्यादयः "गुणाः" धर्माः भवन्ति तथैव काव्ये माधुर्य ओजः तथा च प्रसादः एते गुणाः भवन्ति अतः यादृशी मानव शरीरे आत्मनः स्थितिः तादृशी स्थिति भवति काव्ये रसस्य यथा शौर्यादयः मानवीयाः गुणाः तस्य आत्मनः शरीरस्य च उत्कर्षं (उत्थानं) कुर्वन्ति । तथैव माधुर्यादयः गुणाः काव्यस्य अङ्गाङ्गी रसानां उपकारकाः भवन्ति । आचार्यः कारिकायां अचलस्थितयः इति शब्दस्य उल्लेखं अकरोत् । तेन अत्र अस्य अभिप्रायः यत् ते गुणाः काव्ये रसे (वा) "अचला" अर्थात् अनिवार्य रूपेण भवन्ति । एतेषां गुणानां काव्ये नियतस्थितिः भवति । अनेन कोऽपि एकः अर्थ भवः यत् रसं विना गुणानां कदापि सम्भावना नास्ति द्वितीयः अर्थ यत् ते गुणाः रसेन सह विद्यमाना सन्तः रसस्य उपकारकाः भवन्ति । यथा शौर्यादयः गुणाः मानवस्य शरीरात् आत्मनश्च पृथक् न सन्ति । तथैव इमे गुणाः अर्थात् माधुर्य ओजः तथा च प्रसादः रसेन (रसैः वा) सह अनिवार्य रूपेण भवन्ति गुणं विना रसस्य सम्भावना कदापि न भवति एतेषां गुणानां

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्

क्रमशः अनेन उल्लेखः क्रियते ।

(1) माधुर्य गुणः :-

आचार्य मम्मटः माधुर्य गुणस्य स्वरूपं कथयति यत् अयं गुणः आह्लादकः अर्थात् मन-मानसं द्रवयति भवति । अनेन चित्ते अत्यधिका द्रुतिः भवति । द्रुतिशब्दे हृदये मन-मानसः विशेषा अनुभूतिः भवति तस्य लक्षणं आचार्यः एवं प्रतिपादयति

"आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ॥"

अयं गुणः सम्भोग शृङ्गारे आधिक्येन दृश्यते क्रमेण अस्य गुणस्य आधिक्यं करुण रसे विप्रलम्भ शृङ्गारे तथा च शान्त रसे दृश्यते । अस्य गुणस्य प्रयोगः प्रायेण कवयः कुर्वन्ति । अस्य गुणस्य उदाहरणं अनेन प्रकारेण दृश्यते

यथा :- अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥

अस्मिन् गुणे कोमलकान्त-शब्दानां वर्णानां च प्रयोगः भवति । टवर्गरहित (ट, ठ, ड, ढ इत्येतेषाम्) वर्णाः अर्थात् स्पर्शः वर्णः टवर्गं त्यक्त्वा भवति वर्गस्य अन्तिमस्य अक्षरस्य अस्मिन् आधिक्येन प्रयोगः भवति । लघुस्वरेण युक्तः रकारः तथा च णकार ~~[illegible]~~ अस्मिन् गुणे भवन्ति । किन्तु समासानां मध्ये समासानां च अस्मिन् प्रयोगः दृश्यते ।

(2) ओज गुणः :-

ओज शब्देन अत्र आन्तरिकी शूरता अस्ति अस्मिन् गुणे उत्साहेन हृदयस्य विस्तारः तथा च आन्तरिकी दीप्तिः भवति आचार्यः अस्य लक्षणं अनेन प्रकारेण

लभ्यते – यथा : दोर्दण्डाञ्चितहेतु राजो वीररसाय स्यात् ।
मुख्य रूपेण अयं गुणो वीर रसे दृश्यते तथान्य बीभत्से रौद्रे च अस्य गुणस्य आधिक्यं भवति मुख्य रूपेण अस्मिन् गुणे दीर्घ समासाः, उद्धत रचना तथा च कठोर शब्दानां प्रयोगः दृश्यते । यथा :

“चञ्चद्भुजभ्रमितचण्डगदाभिघात -
संचूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणि -
रुत्तंसयिष्यति कचांस्तव देवि भीमः” ॥

3 प्रसाद गुणः :-

प्रसाद गुणस्य सम्बन्धे आचार्याः कथयन्ति यथा शुष्के इन्धने दहनः अग्निः सरलतया प्रविष्टः भवति तथा च स्वच्छ निर्मले जले यथा शीघ्रं व्याप्नोति तथैव यस्य गुणस्य माध्यमेन शीघ्रमेव अर्थस्य व्याप्तिः भवति सः गुणः प्रसादः अस्ति । तस्य लक्षणं आचार्यः अनेन प्रकारेण करोति । –

शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः
व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः ।

अयं गुणः मुख्यतया सर्वेषु रसेषु सर्वासु च रचनासु मिलति । अस्मिन् गुणे चित्तस्य विकासः भवति । रसस्य व्याप्तिः शुष्क इन्धने अग्निवत् स्वच्छ वस्त्रे जलवत् भवति । अस्मिन् गुणे शब्दाः तत्कालमेव अर्थबोधकाः भवन्ति अर्थात् श्रवणमात्रेण अर्थस्य प्रतीतिः भवति । अस्य समासाः वर्णाः सरलाः सुबोधाः च भवन्ति । यथा :-

परिम्लानं पीनस्तनजघनसङ्गादुभयतः

तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥

~~[illegible]~~
~~[illegible]~~
~~[illegible]~~ । अनेन प्रकारेण एते त्रयः गुणाः प्रायेण आधुनिकैः आचार्यैः स्वीकृताः भवन्ति । वामनोक्तानां शब्दार्थानां आधारेण प्रणीतानां गुणानां अन्तर्भावः अपि एतेषु एव ~~[illegible]~~ गुणेषु दृश्यते ।

प्र०२० केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ।

उत्तरम् :- अस्यां कारिकायां आचार्यमम्मटः वामनद्वारा प्रणीतानां गुणानां खण्डनं करोति । मम्मटस्य कथनमस्ति यत् वामनेन शब्दस्य आधारेण ये दश गुणानां उल्लेखः कृतोऽस्ति । तेषां मध्ये अनेकेषां गुणानां अन्तर्भावः माधुर्यादिषु त्रिषु गुणेषु एव भवति । अनेके गुणाः दोषाणां परित्यागेन स्वयं निरस्ताः भवन्ति । शेषाः ये गुणाः सन्ति ते दोषरूपेण काव्ये दृश्यन्ते । अतः तेषां गणना दोषेषु भवति, न तु गुणेषु । अतः आचार्यवामनस्य शब्दगुणानां खण्डनं कृत्वा वदति यत् शब्दस्य आधारेण गुणानां गणना अथवा परिकल्पना सम्भवा नास्ति । यतः शब्दार्थौ केवलं काव्यस्य शरीरं धारयतः न तु आत्मानं । वामनेन ये दश गुणाः निर्धारिताः सन्ति, परवर्तिभिः आचार्यैः अस्य

श्लेष समाधि उदारता प्रसाद माधुर्य अर्थव्यक्तिः समता सौकुमार्यं कान्तिः

समर्थनं कुत्रापि न कृतमस्ति । अतः आचार्यः स्पष्टं करोति मत गुणानां संख्या केवलं त्रयः अस्ति न तु दश ।

प्रश्न (1) वामनोक्तानां दशशब्दगुणानां खण्डनं कृत्वा मम्मट-मतं प्रदर्शनीयम् ?

उत्तरम् : आचार्यः वामनः स्वकीये लक्षणग्रन्थे शब्दे अर्थे च काव्यस्य स्वरूपं मानयति । तस्य कथनमस्ति मुख्यतया शब्देषु अर्थेषु एव काव्यस्य रचना दृश्यते । वामनद्वारा प्रमाणिताः दशशब्दगुणाः एते सन्ति —

(1) ओजः (2) प्रसादः, (3) श्लेषः, (4) समता, (5) समाधिः, (6) माधुर्यः, (7) सौकुमार्य, (8) उदारता (9) अर्थव्यक्तिः (10) कान्तिः ।

गाढबन्धत्वं ओजः :- वामनस्य अस्य गुणस्य सम्बन्धे कथनमस्ति यत् ओजस्य गुणे पद रचनायां गाढबन्धत्वं भवति तथा च शिथिलतायाः सर्वथा अभावः भवति यथा :

"विलुलितमकरन्दा मञ्जरीर्नर्तयन्ति" ॥ आस्य ।

अस्य गुणस्य सम्बन्धे आचार्य मम्मटस्य कथनमस्ति यत् एतादृशी स्थितिः ओजगुणस्य अलंकारः मन्यते । अतः अस्य ओजगुणस्य अलंकारः स्वीकृतस्य ओजगुणे एव अन्तर्भावः भवति । अतः शब्दस्य आधारेण अस्य गुणस्य पृथक् गणना उचिता नास्ति ।

शैथिल्यं - प्रसाद गुणः :- आचार्य वामनः कथयति यत् पद रचनानां शिथिलता एव प्रसाद गुणः अस्ति । अतः (आचार्य मम्मटस्य) कथनमस्ति यत् मम्मट द्वारा स्वीकृते प्रसाद गुणे एव अस्य गुणस्य सरलतया भवति । अतः अन्तर्भावः ।

अस्यापि पृथक् ~~गणना~~ गणना उचिता नास्ति।

३. असमस्तत्वं श्लेषः : मसृणत्व रूपस्य अर्थो इति मतं : बहूनामपि पदानामेकपदवद्भासमानत्वं यः सः श्लेषः तस्य अन्तर्भावः ओजोगुणे अस्ति।

~~मार्गाभेदः समता : समता नामकः गुणोऽपि ओजगुणस्य ग... [illegible] अस्यापि पृथक् गणना उचिता नास्ति।~~

४. आरोहावरोहक्रमः समाधिः : मम्मट मतेन वाक्येषु शब्दानां आरोहः अवरोहः क्रमः एव यः गुणः अस्ति तस्य अन्तर्भावः ओजोगुणे अस्ति।

५. पृथक् पदत्वं माधुर्यम् : माधुर्य-नामक-गुणः प्रकारान्तरेण दीर्घ समासानां अभावः अस्ति। अतः मम्मट-द्वारा स्वीकृत माधुर्य-गुणे एव अस्य अन्तर्भावः अस्ति।

६. विकटत्वम् उदारता : पदानां विकटता अर्थात् नृत्यप्रायता उदारता नामको गुणो दृश्यते। मम्मट मतेन अस्यापि अन्तर्भावः ओजगुणे एव कर्तुं शक्यते।

७. अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः : अविलम्बरूपेण अर्थस्य बोधः यः भवति स अर्थव्यक्तिः नामकः गुणः अस्ति। तस्य अन्तर्भावः प्रसाद-गुणे एव सरलतया कर्तुं शक्यते।

८. मार्गाभेदः समता : समता नामकः यः गुणोऽस्ति सः मम्मटमतेन क्वचित् दोषो सत्यपि आगच्छति क्वचित् च दोषरूपं न [illegible] एव तत्कारणं "अजरठत्वं सौकुमार्यम्" तथा च

९. "औज्ज्वल्यं कान्तिः" इमौ द्वौ कष्टत्वं तथा च ग्राम्यत्वं अनयोः द्वयोः काव्य दोषयो रूपता अस्ति। अतः एतयोः गणना दोष रूपे अस्ति न तु गुण रूपे। अतः

प्र०(२२) → वामनद्वारा प्रतिपादित दश अर्थगुणानां स्व सार्थ →

नोट (१३) Note ① ओजः ②प्रसादः ③श्लेषः ④समाधिः ⑤माधुर्यः ⑥उदारता ⑦अर्थव्यक्ति ⑧समता ⑨सुकुमारता ⑩कान्तिः

आचार्यः मम्मटः स्पष्टरूपेण दश-शब्द-गुणानां खण्डनं कृत्वा क्रमशः एव गुणानां अर्थरूपता प्रमाणिकता अप्रमाणिता इति सिद्ध्यति ।

प्र० २१ तेन नार्थगुणा वाच्याः ? अर्थं काव्यकारिः मम्मटेन मतेन व्याख्येयाः ।

प्र० वामनोक्तानां दश अर्थगुणानां मम्मट-मतेन खण्डनं क्रियताम् (निराक्रियताम्)

उत्तरं : आचार्यवामनः स्वकीये लक्षणग्रन्थे शब्दानां अर्थानां च आधारेण गुणानां विश्लेषणं अकरोत् । आचार्यमम्मटः शब्दार्थौ काव्यशरीरं स्वीकरोति अतः आत्मनः अङ्गभूताः गुणाः शब्दार्थयोः न भवन्ति । अपितु रसैः सह गुणानां सम्बन्धः इति प्रतिजानाति । पूर्वं मम्मटः वामनेन प्रतिपादितां शब्द गुणानां निराकरणं अकरोत् तद्वत् अर्थगुणानामपि खण्डनं करोति । अनेन स्वकारणेन आचार्येण पूर्वोक्ताः कारिकाः उल्लिखिताः सन्ति । अधुना क्रमशः वामनोक्तानां दश अर्थगुणानां मम्मटमतेन निराशः अस्माभिः ~~प्रतिपाद्यते~~ सम्पाद्यते ।

(१) ओजः :

वामनानुसारेण अर्थस्य प्रौढिः ओजः ? इयं प्रौढता लक्षणग्रन्थेषु पञ्चविधाः प्रमाणिताः सन्ति यथा एकस्य पदस्य अर्थस्य प्रकटनाय वाक्यस्य प्रयोगः । क्वचित् च वाक्यार्थे च पदस्य प्रयोगः क्वचित् च एकस्य वाक्यस्य अर्थविस्तारे अनेकेषां वाक्यानां उल्लेखः । क्वचित् एकवाक्यद्वारा संक्षेपेण अनेकेषां वाक्यानां अर्थप्रकटनम् । क्वचित् च विशेषणस्य साभिप्रायता । मम्मटमतेन अयं नास्ति गुणः केवलं

अपुष्टार्थत्वस्य
~~अपुष्टार्थस्य~~ दोषस्य अभाव मात्रमस्ति ।

२ प्रसादः :-

अर्थस्य विमलता एव प्रसादः अस्ति। अर्थात् अनेकैः पदैः अपेक्षितस्य अर्थस्य प्रतीतिः । अयं प्रसादनामकः गुणोऽपि अधिक-पदत्व-नामकस्य दोषस्य अभाव मात्रमस्ति ।

३ माधुर्यम् :-

उक्ति वैचित्र्यम् माधुर्यम् भवति । अर्थात् एकम् अर्थं भिन्न प्रकारेण कथनं । मम्मट मतेन अयं अनवीकृतत्व दोषस्य अभावमात्रमस्ति । न तु ~~गुणस्वरूपः~~ गुणस्वरूपः

४ सुकुमारता :-

कठोर प्रसङ्गं कोमल रीत्या कथनं सुकुमारता अस्ति। कठोर भावस्य परित्यागः, अयं सुकुमारता रूपस्य अश्लीलत्व नामकस्य दोषस्य अभाव मात्रमस्ति ।

५ उदारता :-

ग्राम्यता प्रसङ्गे अपि विदग्धताद्वारा अर्थस्य प्रकटनं उदारता गुणो अस्ति । अयं उदारता नामकः गुणः ग्राम्यता नामकस्य दोषस्य अभाव मात्रमस्ति न तु गुणः ।

६ अर्थ व्यक्तिः :-

वर्णनीयस्य वस्तुनः स्वाभाविक रूपेण वर्णनं अर्थ-व्यक्तिः अस्ति । अतः वस्तु स्वभाव वर्णनं गुण रूपं नास्ति, अपितु स्वभावोक्ति नामकस्य अलंकारस्य मध्ये एव अस्य अन्तर्भावः भवति ।

७ कान्तिः :-

सा कान्तिः शृङ्गारादीनां रसानां स्पष्टतया प्रतीतिः अस्ति । अतः अयं कान्तिनामकः गुणः अर्थगुणः, गुणीभूतव्यङ्ग्ये एव संग्रहीतः भवति । अतः पृथक्तया अस्य गणना अपेक्षिता नास्ति ।

(३) श्लेषः :-

क्रमस्य अतिक्रमणे अस्पष्टतया युक्तिः युक्तः कथनमेव श्लेषः अस्ति । अतः इदं केवलं उक्ति वैचित्र्यम् अस्ति न तु किञ्चिद् अन्यत् ।

(४) समता :-

कस्मिन्नपि विषमस्य अभावः समता नामकः गुणः । परन्तु अयमपि प्रक्रमभङ्ग नामकस्य दोषस्य अभाव मात्रमस्ति, न तु अर्थगुणः ।

(५) समाधिः :-

अर्थदृष्टिः समाधिः अर्थात् कविद्वारा अनुल्लिखितः तथा च प्राचीन कविद्वारा उल्लिखितः अर्थः उद्भावित रूपेण अर्थस्य काव्ये दर्शनमेव समाधिः नामकः गुणः । अतः अयमपि मम्मटस्य कथनानुसारेण समाधि-नामकः अर्थगुणः नास्ति । अपितु केवलं काव्यस्वरूपस्य निर्वाहः मात्रमस्ति । अतः अस्यापि पृथक्तया गुणरूपेण उल्लेखस्य आवश्यकता नास्ति ।

2023. 3. उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ अथवा
के अलंकाराः कति विधाः काव्ये अलंकाराणां किं स्थानम्)

उत्तरम् - लक्षण ग्रन्थेषु सर्वप्रथमं काव्यशरीरं, तस्य आत्मा च तस्य
अङ्गानि इत्यादीनां उल्लेखः भवति । शरीर-सौन्दर्य-वर्धकानां
रीतीनां उल्लेखः भवति । शौर्यादि सदृशं माधुर्यादीनां
(विवरणं) गुणानां [illegible] वर्णं लभामहे, प्राप्त काले [illegible] कारिकायां
अलङ्काराणां निरूपणमस्ति । अलंकाराः काव्यस्य शोभा वर्धकाः
भवन्ति । काव्ये अङ्गभूताः शब्दाः अर्थाः च अलंकारैः
अलंकृताः भवन्ति । ते अलंकाराः अङ्गद्वारा अर्थात्
शब्दार्थद्वारा काव्यस्य आत्मनः रसस्यापि उपकारकाः भवन्ति
यथा नारी शरीरे कण्ठस्य हारः कर्णाभूषणानि अन्ये वा
अलंकाराः नारी शरीरं सज्जयन्ति तथैव अनुप्रासादयः
अलंकाराः शब्दानां उपमादयः अलंकाराः अर्थानां
शोभां वर्धयन्ति । इमे अलंकाराः शोभा वर्धकाः
भवन्ति न तु गुणवत् शोभाजनकाः । यत्र गुणाः प्रत्यक्ष
रूपेण रसस्य उपकारकाः भवन्ति तत्र अलंकाराः शब्दस्य
च अर्थस्य माध्यमेन काव्य शोभायां योगदानं ददाति ।
गुणाः यत्र अनिवार्य रूपेण काव्ये विद्यमानाः भवन्ति तत्र
अलंकाराणां आवश्यकता तु अस्ति परन्तु नास्ति तेषां
अनिवार्यता । यथा आभूषण-सज्जिता नारी, नारी
अस्ति, आभूषणं विना अपि सा नारी एव
भवति तस्याः सौन्दर्यं भासते । तथैव काव्ये
अलंकाराणां प्रयोगेण काव्यस्य शोभा वृद्धिः भवति ।

for learning निर्वाचन + अलंकार

अलंकाराः तदापर्यन्तं एव काव्यस्य उपकारकाः सन्ति। यदा-पर्यन्तं ते रसं अनुसरन्ति। अलंकाराणां भारः ‹‹ अर्थात्
अनावश्यक प्रयोग अधिक्रमम् न श्रोता वर्धकः न भवति अपितु शोभा-हन्ता अतः निपुणः कविः उचित प्रसङ्गेषु उचित मात्रायां अलंकाराणां प्रयोगं ~~कुर्वन्ति~~ करोति।

"अथ नवम उल्लासः"

१०- 'वक्रोक्ति अलंकारः' (Total 23) (20)

आचार्य मम्मटः वक्रोक्ति नामकस्य अलंकारस्य लक्षणं अनेन प्रकारेण करोति। यथा -

यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥

अर्थात् यत्र वक्ता भिन्नेन अभिप्रायेण वाक्य प्रयोगं करोति परन्तु श्रोता द्वितीयमेव अभिप्रायं जानाति इयं वक्रोक्ति अलंकारः। एतत् श्लेष वक्रोक्तिः तथा च काकु वक्रोक्तिः इति द्विविधा विभज्यते / कथ्यते /

श्लेषस्य उदाहरणम् -

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान्।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः॥

अत्र वक्ता नारीणां इति शब्दं स्त्रीणां कृते प्रयोगं करोति। परन्तु श्रोता न अरीणां अर्थात् शत्रूणां न इति अर्थं कल्पयति।

काकु वक्रोक्तिः यथा :-

गुरुजन परतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिललालित नैष्यति सखि, सुरभि समयेऽसौ ॥

अस्मिन् उदाहरणे सामान्यतया "न आगमिष्यति" इति अर्थस्य प्रतीतिः भवति परन्तु कण्ठस्य काकुद्वारा अयं अर्थः प्रतीयते यत् सः अवश्यमेव आगमिष्यति ।

समन्वयः :-

श्लेष वक्रोक्त्याम् नारीणां इति शब्दे वक्तुः मते अन्यः अस्ति श्रोतुः मते च भिन्नः तथा च काकु वक्रोक्त्यां काकु ध्वनि द्वारा अर्थः भिन्न एव भवति । अतः द्वयोः उदाहरणयोः वक्रोक्ति नामकः अलंकारः ।

(ख) अनुप्रासः :-

लक्षणम् :- वर्ण साम्यमनुप्रासः :- अर्थात् यत्र वर्णानां स्वर-व्यञ्जन-रूपेण समानता भवति तत्र सः अलंकारः ।

उदाहरणम् :- अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥

समन्वयः :-

अस्मिन् उदाहरणे रकारः लकारः इत्यादीनां वर्णानां पुनरावृत्तिः अस्ति । अतः अनुप्रासः नामकः अलंकारः । आचार्य मतेन छेकानुप्रासः तथा च वृत्त्यनुप्रासः इति रूपेण अस्य अलंकारस्य भेद द्वयम् ।

ओजः प्रसाद श्लेषसमता समाधि माधुर्य सौकुमार्योदारता ।
-अर्थव्यक्ति कान्तियो बन्ध गुणाः ।
बन्धः = पद रचना, गुणाः = ओजः प्रभृतयः ।

Vivek

Z ✓

16

1. वक्रोक्तिः ✓ — 2
2. अनुप्रासः ✓ — 8
3. यमकम् ✓
4. उपमा ✓ — 18 — 3
5. उत्प्रेक्षा (ससन्देहः) — 4
6. अपह्नुतिः ✓ — 5
7. निदर्शना ✓ — 6
8. अप्रस्तुतप्रशंसा
9. अतिशयोक्तिः
10. प्रतिवस्तूपमा ✓
11. तुल्ययोगिता ✓
12. व्यतिरेकः
13. विभावना — 9
14. विशेषोक्तिः ✓ — 7
15. अर्थान्तरन्यासः ✓ — 1
16. स्वभावोक्तिः
17. व्याजस्तुतिः
19. काव्यलिङ्गम् ✓
20. कारणमाला ✓
21. असङ्गतिः ✓
22. विषमः
23. भ्रान्तिमान ✓

1.1 – P.75
1.2 – P.70
1.3 – P.72
2 – P.65
3 – P.66
4 – Not Here
5 – P.64
6 P.68

ज्योतिर्विदाचार्य पं. सन्तरामात्मज
डॉ० महीधर शास्त्री
एम.ए. (सं.) आचार्य (ज्यो.) पी.एच.डी. (ज्यो.)
अध्यक्ष ज्योतिष विभाग (सेवानिवृत)
राजकीय संस्कृत कॉलेज,
सोलन-173 212 दूरभाष : 2168



"ॐ श्री हनुमते नमः"

Dr. Mahi Dhar S…
M.A. (Skt.) Acharya
Ph. D. …
Head of the Jyotish Deptt.
Govt. Sanskrit …
SOLAN-…
Phon…

यमकम्

उदाहरणम् — नव पलाशपलाशवनं पुरः
स्फुट परागपरागत पङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः ॥

समन्वयः → अस्मिन् पद्ये पलाश-२ इत्यादि द्वयोः शब्दयो… तेनैव क्रमेण। स्वरव्यञ्जना आवृत्ति वर्तते तथा च … प्रथमपलाशस्य पत्ररूपी अर्थं च द्वितीयपलाशस्य भिन्नार्थो वर्तते। एवमेव पराग-२ लतान्त-२ सुरभि… अतः यमकनामको अलंकारो भवति।

उपमा

उदाहरणम् — वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

समन्वयः — अत्र पार्वत्या शिवस्य च सम्पृक्तता (घनिष्ठता) शब्दार्थयोः संपृक्तावत् कालिदासेन मानिताऽस्ति, यथा शब्दं बिना अर्थ… अर्थस्य बिना शब्दस्य किमपि महत्वं न भवति तथैव श… बिना शिवः शिवस्य बिना शक्तिः सत्ता नास्ति अस्मिन् उमामहादेवयोः तुलना (उपमा) वागार्थाभ्यां सह वर्तते । उ… अस्मिन् पद्ये उपमा नामकः अलंकारो अस्ति।

बन्धः = पद रचना …

17 — यमकम्

लक्षण : अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः यमकम् ।

अर्थात् हे यत्र सार्थकानां भिन्नार्थ युक्तानां वर्णानां वर्णसमुदायस्य पूर्वक्रमेण आवृत्ति भवति तत्र अयं अलंकारः यथा

उदाहरणं : समरसमरसोऽयं ॥

समन्वयः : अस्मिन् उदाहरणे पूर्वं समर शब्दः सार्थकः भूत्वा द्वितीय-समरशब्दोऽपि भिन्नार्थको भूत्वा सार्थकः अस्ति अतः इदं यमकस्य उदाहरणं सर्वथा सार्थकता अस्ति ।

5 उपमा

लक्षणं : साधर्म्यमुपमा भेदे । अर्थात् उपमानस्य उपमेयस्य च भेदत्वेन द्वयोः गुण क्रियायां धर्मस्य समानता अस्ति अस्मिन् अलंकार भवति ।

उदाहरणं : तेन तुल्यं मुखं ।

समन्वयः : अस्मिन् उदाहरणे तेन शब्देन कमलस्य उपमा अस्ति अर्थात् कमलसदृशं मुखम् । अनेन प्रकारेण अत्र उपमेयस्य उपमानेन सह तुलनया इयं उपमा लक्षणं पूर्णं अस्ति ।

1 — उत्प्रेक्षा ।

लक्षणम् : सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

अर्थात् प्रकृतस्य वस्तुनः सम अर्थात् उपमानेन सह या सम्भावना क्रियते तस्या सम्भावनायाः उत्प्रेक्षा नामकः अलंकारः ।

6 — Initial ...

१८

उदाहरणम् :- लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥

समन्वयः :- अस्मिन् उदाहरणे अन्धकारस्य यः विस्तारः तस्य लेपन आदि रूपेण सम्भावना कृता अस्ति। अतः इदम् उत्प्रेक्षा नामकस्य अलंकारस्य उदाहरणम्।

१८ — ससन्देहः

लक्षणम् :- ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः।

अर्थात् यत्र सन्देहः सह उपमेयस्य उपमानेन सह संशयात्मकं ज्ञानं भवति तत्र भवति अयम् अलंकारः।

अयं सन्देहः भेदोक्तिः तथा च भेदानुक्तिः इत्यपि भवति।

उदाहरणम् :- अयं भवति

अयं मार्तण्डः किं? स खलु तुरगैः सप्तभिरितः
कृशानुः किं? सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं? साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः॥

समन्वयः :- अस्मिन् उदाहरणे ~~अन्धकारस्य यः विस्तारः~~ कस्मिंश्चिद् वीर पुरुषं प्रति ~~कल्पनादि~~ कथितः अस्ति। यत्र तस्य शत्रवः भिन्न-२ रूपेः तस्य सम्बन्धे संशयात्मिकाम् अनुभूतिं कुर्वन्ति। सूर्यः अग्निः तथा च यमः इत्यादि रूपेण तं प्रति संशयात्मकं ज्ञानं भवति।

१९ — अपह्नुतिः

लक्षणम् :- प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः॥

अर्थात् यत्र वर्णनीयस्य उपमेयस्य निषेधं कृत्वा उपमानस्य सिद्धिः भवति अथवा क्रियते तत्र भवति (उपरोक्तः अलंकारः)

उदाहरणम् :- अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥

अन्वयः :- अस्मिन् उदाहरणे अवाप्तः इत्यादिषु शब्देषु उपमेय रूपे कलङ्के अभावः इति उक्त्वा उपमानभूतायाः रात्रेः सत्यता स्थापिता, कृता अस्ति अनेन कारणेन अत्र अपह्नुतिः नामकः अलङ्कारः ।

४ निदर्शना

लक्षणं :- अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः ।

अर्थात् यत्र पदार्थानां वाक्यार्थानां वा ~~अन्यपदार्थानां~~ ~~उपमायाः आरोपः क्रियते~~ । तत्र भवति अयं अलङ्कारः ।

यः उपमानोपमेयभावे परिणतो भवेत

उदाहरणम् :-

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।

अन्वयः :-

अस्मिन् उदाहरणे यथा उडुपद्वारा विशालस्य सागरस्य तरणं कठिनं भवति तथैव (कालिदासस्य) बुद्धिद्वारा विस्तृतस्य सूर्यवंशस्य वर्णनं कठिनं अस्ति । अतः अत्र उपमायां कवेः अतिः परिणता भवति । अतः अनेन परिणतेन अत्र निदर्शना नामकः अलङ्कारः ।

क्रमशः

21 10-11

B अप्रस्तुतप्रशंसा -

लक्षणं :- अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥

अर्थात् अप्रस्तुत वस्तुनः वर्णनं, प्रस्तुत वस्तुनः प्रतीत्याः निमित्तं यत्र भवति तत्र प्रशंसालङ्कारः ।

उदाहरणम् :-

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥

समन्वयः :- अप्रस्तुत

अस्मिन् उदाहरणे गमनात् कार्यं ~~[struck]~~ अत्र प्रकारेण ~~[struck]~~ प्रियायाः भाविनः मरणोत्साहस्य कथनं कृतमस्ति । अतः अत्र कार्ये प्रस्तुते सति कारणवर्णनरूपं अप्रस्तुतप्रशंसा अस्ति ।

अद्य प्रकरणस्य अत्र

C अतिशयोक्ति ।

लक्षणम् :- निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ।
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयातिशयोक्तिः सा -

अर्थात् यत्र उपमानद्वारा प्रकृतस्य अर्थात् उपमेयस्य निगरणं कृत्वा तेन सह कल्पितस्य अभेदस्य निश्चयः क्रियते तत्र अतिशयोक्ति नामकः अलंकारः ।

उदाहरणम् :- कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमार सुभगेत्युत्पातपरम्परा केयम् ।

समन्वयः - अध्यवसानम्

अत्र आर्याया उदाहरणे ~~प्रकृतायाः~~ प्रकृतायाः कामिन्याः कमलादिरूपेण अध्यवसानम् ~~अध्यवसानम्~~ (निश्चयः) कृतमस्ति तेनैव कारणेन अत्र अतिशयोक्ति नामकः अलङ्कारः।

17- प्रतिवस्तूपमा

लक्षण: प्रतिवस्तूपमा तु सा

सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः॥

अर्थात् यत्र उपमान रूपे उपमेय रूपे च वाक्ये एकस्यैव साधारणधर्मस्य द्विवारं ग्रहणं क्रियते तत्र अयं अलङ्कारः।

उदाहरणम् -

देवीभावं गमिता परिवारपदं कथं भजत्येषा।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम्॥

समन्वयः -

अत्र उपमेयस्य उपमानस्य च एकस्यैव साधारणधर्मस्य "राजमहिषी पद प्राप्ते" इति वर्णिता अस्ति अनेन कारणेन अत्र पूर्वोक्तः अलङ्कारः। (वर्णितमस्ति)

18- तुल्ययोगिता।

लक्षणम् - नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता।

अर्थात् - यत्र (प्रकृतानां) (उपमेयस्य) (अप्रकृतानां) उपमानस्य (उपमानस्य) (अप्रकृतानां) साधारणधर्मस्य एकवारमेव ग्रहणं क्रियते तत्र तुल्ययोगिता नामकः अलङ्कारः।

उदाहरणम् -

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥

कुमुदकमलनीलनीरजालिर्ललितविलासजुषां दृशां पुरः का ।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ॥

समन्वयः - अत्र उपमेयस्य उपमानस्य च एकस्यैव न गच्छेगःसामान्य धर्मः तस्य एकवारमेव ग्रहणं क्रियमाणं । अनेन तुल्ययोगिता नाम अलंकारः ।

15 व्यतिरेकः

लक्षणः - उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।

अर्थात् व्यतिरेकः नामकः अलंकारः तत्र भवति यत्र उपमानस्य अपेक्षया उपमेयस्य गुणविशेषद्वारा उत्कर्षः वर्णितः अस्ति ।

उदाहरणम् -

क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि, यौवनमनिवर्ति यातं तु ॥

समन्वयः -

अस्मिन् उदाहरणे ~~उपमेयस्य~~ उपमानस्य अपेक्षया उपमेयस्य (यौवनस्य ~~कार्यपरतायाः~~ अस्थिरता) आधिक्यमेव विवक्षितं अस्ति । अनेन प्रकारेण अत्र व्यतिरेकः अलंकारः ।

16 विभावना

लक्षण - क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ।

अर्थात् विभावना नामकः अलंकारः तत्रास्ति यत्र कारणं विना कार्यस्य उत्पत्तिः वर्णिता भवति । अथवा कारणस्य प्रतिषेधेऽपि कार्यरूपस्य फलस्य यत्र प्रकाशनं क्रियते तत्र विभावना अलंकारः अस्ति ।

उदाहरणम् -

कुसुमितलताभिरहताऽप्यधत्त रुजमलिकुलैरदष्टाऽपि
परिवर्तते स्म नलिनीलहरीभिरलोलिताऽप्यघूर्णत सा

कार्याणां

समन्वयः :- अत्र अस्मिन् उदाहरणे कुसुमलताभिः [illegible] न प्रताड़ितो नायिकावदनायाः अनुरागं करोति, इत्यादि अत्र कारणानि तु न सन्ति परन्तु ~~[illegible]~~ अत्र वर्णनं दृश्यते, अतः इदं विभावना नामकस्य अलंकारस्य उदाहरणं सुस्पष्टम्।

विशेषोक्तिः

लक्षणम् :- विशेषोक्तिरखण्डेषु कारणेषु फलावचः।

2 अर्थात् यत्र कारणानि तु सन्ति भवन्ति परन्तु कार्यस्य सर्वथा अभावः भवति तत्र अयं अलंकारो भवति।

उदाहरणम् :-

निद्रा निवृत्ता उदिते द्युरत्ने सखीजने द्वारपदं पराप्ते।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥

समन्वयः :-

अस्मिन् उदाहरणे निद्रायाः निवृत्तिः, सूर्यस्य उदयः ~~उदयात्~~, सखिजनस्य द्वारपदे प्राप्तिः उपपतिद्वारा आलिङ्गनस्य शिथिलता इत्यादीनि कारणानि तु सन्ति। परन्तु अङ्गना (नायिका) आलिङ्गनं न त्यजति ~~इत्यादि~~ इति कार्यस्य अभावः अस्ति। अतः अयम् अलंकारः।

अर्थान्तरन्यासः

लक्षणम् :- सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥

अर्थात् :- साधर्म्य वैधर्म्य द्वारा (यत्र) सामान्यस्य विशेषेण विशेषस्य सामान्येन यत्र समर्थना क्रियते तत्र अर्थान्तरन्यास अलंकारः।

उदाहरणम् :-

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥

समन्वयः :

अस्मिन् उदाहरणे श्लोकस्य पूर्वार्धे सामान्य-वार्तायाः कथनमस्ति । तस्य उत्तरार्धद्वारा "पश्यति" इति विशेषेण अर्थेन समर्थनं कृतमस्ति । अतः विशेषेण सामान्यस्य समर्थनात् अत्र अर्थान्तरन्यासः नामकः अलङ्कारः अस्ति ।

17 स्वभावोक्तिः ।

लक्षणम् : स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ।

अर्थात् यत्र बालकादीनां अथवा अन्य पशुपक्षीणां रूपक्रियादीनां स्वाभाविकं वर्णनमस्ति तत्र स्वभावोक्तिनामकः अलङ्कारः ।

उदाहरणम् : ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

समन्वयः : अस्मिन् उदाहरणे दुष्यन्तस्य शरभयात् भीतस्य मृगस्य स्वाभाविकं वर्णनमस्ति । अनेन कारणेन अत्र स्वभावोक्तिः नामकः अलङ्कारः ।

18 व्याजस्तुतिः ।

लक्षणम् : व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

अर्थात् यत्र निन्दायाः व्याजेन स्तुतिः, स्तुतिव्याजेन च निन्दा वर्णिता भवति । तत्र उपरोक्तः अलङ्कारः भवति ।

उदाहरणम् : हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ॥

त्वयत्पर्ण्यजनोपकारधारणा वैमुख्य लेशं यशो -
भारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः ॥

अत्र अस्मिन् उदाहरणे सागरस्य निन्दायाः व्याजेन स्तुतिः वर्णिता अस्ति। अनेन कारणेन अत्र व्याजस्तुतिनामकः अलंकारः।

19 काव्यलिङ्गं हेतोर्वाक्यपदार्थता

लक्षणम् :- काव्यलिङ्गं हेतोर्वाक्यपदार्थता।

अर्थात् काव्य लिङ्ग नामकः अलंकारः तत्र भवति यत्र वाक्यार्थस्य अथवा पदार्थस्य रूपे हेतुः वर्णितो भवति।

उदाहरणम् :-

वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा।
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥

समन्वयः :-

अस्मिन् उदाहरणे तदिदम् इति शब्देन द्योतितं पाप विशेषः इति अस्य हेतुः अस्ति। अतः हेतुः अत्र वाक्यार्थ रूपेण अस्ति अनेन कारणेन अत्र काव्यलिङ्ग नामकः अलंकारः।

20 कारणमाला

लक्षणम् :- यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता,
तदा कारणमाला स्यात्।

अर्थात् यत्र उत्तरोत्तरं प्रति पूर्वस्य अर्थस्य कारणता भवति तत्र अयं अलंकारः।

उदाहरणम् :-

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥

अत्र जितेन्द्रियत्वं विनयस्य कारणम्, तथा च विनयः गुणप्रकर्षस्य, गुणप्रकर्षः जनानुरागस्य, तथा च जनानुरागः सम्पदः कारणमस्ति, अनेन कारणेन अत्र ~~कारण~~ कारणमाला नामकः अलंकारः ।

(३१) असङ्गतिः

लक्षणम् :- भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ॥

अर्थात् असङ्गति नामकः अलंकारः तत्र भवति यत्र कारणस्य कार्यस्य च स्थानेषु सर्वथा भिन्नता भवति ।

उदाहरणम् :-

यस्यैव व्रणस्तस्यैव वेदना भवति तज्जनोऽलीकम् ।
दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम् ॥

समन्वयः :-

अत्र अस्मिन् उदाहरणे दन्तक्षतं ~~वध्वा~~ कपोले क्षतोऽस्ति । परन्तु वेदना तत्र नास्ति सा वेदना सपत्नीनां भवति । अतः अस्मिन् उदाहरणे क्षतस्य स्थानं वध्वाः कपोलः वेदनायाः स्थानं सपत्न्यः दृश्यन्ते । अतः द्वयोः कार्यकारणयोः भिन्नदेशत्वेन अत्र असङ्गति नामकः अलंकारः ।

३२ विषमः

लक्षणम् :- क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत् ॥

गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत्स एष विषमो मतः ॥

अर्थात् यत्र द्वयोः सम्बन्धिनोः सम्बन्धः अतिवैषम्येण उत्पन्नः न भवति, कर्ता क्रियायाः फलं न प्राप्नोति तथा च कार्यस्य गुणः क्रियाकारणस्य गुणः क्रियायाः सर्वथा भिन्नः भवति ।

उदाहरणम् :- क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।

समन्वयः :-
अस्मिन् उदाहरणे सूर्यवंशो तथा विषयेषु सन्नामतिः इति द्वयोर्मध्ये सर्वथा वैषम्यम् अस्ति । अनेन इदं विषमालंकारस्य उदाहरणम् ।

(23) 24 9 - भ्रान्तिमान् ??

अस्य लक्षणम् :- भ्रान्तिमानन्य संवित् तत्तुल्यदर्शने /
यदि सादृश्यस्य कारणात् कस्मिन् वस्तुनि कस्यचित् अपरस्य वस्तुनः ज्ञानं भवति तदा भ्रान्तिमान् अलंकारः भवति ।

महाराज ! श्रीमन् ! जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं करिवरमभौमं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥

समन्वयः :- अस्मिन् उदाहरणे भोजराजस्य यशसा धवलिते जगति सर्वत्र परमपुरुषादीनां समुद्रादि भ्रान्तिः अस्ति । अतः अयं भ्रान्तिमानलङ्कारः ।

चतुर्थ उल्लासः

प्र०४ रसस्य स्वरूपं मम्मट मतेन प्रतिपादनीयम् (आ)

3— रसस्य का परिभाषा कानि चतस्य कारणानि इति मम्मट विवेच्य विशदनीयम् ।

उत्तरम् - रसः सर्वेषाम् आचार्याणां (मतेषु) विचारेषु काव्यस्य महत्वपूर्णस्य स्थानस्य अधिकारी अस्ति काव्यशास्त्रे षट् सम्प्रदायाः प्रचलिताः सन्ति । तेषु एकः अस्ति रस-सम्प्रदायः । अस्य सम्प्रदायस्य आचार्याः रस काव्यस्यात्मा स्वीकुर्वन्ति एव । [struck out] आचार्यः मम्मटोऽपि काव्ये रसस्य मुख्य रूपेण पक्षपाती अस्ति रसं विना काव्यस्य सम्भावना तादृशी, यादृशी आत्मानं विना मानवशरीरस्य, आचार्य मम्मटः लक्षणरूपेण रसनिरूपणं अनेनप्रकारेण करोति ।

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥

अर्थात् लोके स्थायी, रति चित्तवृत्ति-विशेषस्य यानि कारणानि सन्ति तथा च कार्य रूपेण कायिक, वाचिक तथा च मानसिक भेदं उत्पादकाः ये कटाक्षाः [struck out] उत्पादकाः तथा च सहकारी रूपेण ये निर्वेदादि सञ्चारि भावाः सन्ति । यदि तेषां भावानां नाटकेषु काव्येषु च वर्णनं क्रियते तदा ते भावाः सहृदयद्वारा क्रमशः विभावः, अनुभावः तथा च व्यभिचारी भावः इति रूपेण [struck out] ज्ञायन्ते तैः विभावादिभिः भावैः सहृदयजनानां हृदयेषु

11.

व्यञ्जना-द्वारा भवन्ति अभिव्यक्तिं भवति न: ~~आस्वाद्यतां~~
आस्वाद्यतां प्राप्ता? साहित्यशास्त्रे रस इति व्यपदिश्यन्ते।
अथवा रस-रूपेण विख्यात: अस्ति। रसस्य कारणभूता:
ये विभावादय: भावा: सन्ति लोके तेषां विलक्षण
स्वरूपमेव प्रतिपादितमस्ति। विभाव:, अनुभाव:तथा च
सञ्चारिभावा: एतेषां त्रिविधानां भावानां संयोगेन
परिपुष्ट: भूत्वा रत्यादय: स्थायिभावा: आस्वादनीया: भवन्ति।
तथा च ते रस्य नाम धारयन्ति। इदं कथ्यते — मानव
हृदये रत्यादय: भावा: अनादिकालरूपेण विद्यमाना: भवन्ति
परन्तु ते भावा: सर्वदा व्यक्तदशायाम् उपस्थिता: न भवन्ति।
वासनारूपेण सूक्ष्मरूपेण च तेषाम् उपस्थिति: भवति ते एव
भावा: साहित्यपण्डितै: स्थायिभावा इति कथिता: सन्ति।
रसभाव: विशेषोऽस्ति। लोके स्नेहादीनां भावानां ये उद्बोधका:
सन्ति ते एव काव्ये आगत्य रसस्य स्वरूपं धारयन्ति।
सहृदयजनानां हृदयेषु सर्वदा विद्यमाना: रत्यादय: भावा:
वासनारूपेण
आलम्बन ~~[illegible]~~ - विभावद्वारा स्थायिभावरूपं धारयन्ति।
उद्दीपनविभाव-द्वारा ते उद्दीप्ता: भवन्ति। अनुभावद्वारा
प्रतीतियोग्या: भवन्ति। व्यभिचारिभावद्वारा तस्य रसस्य
परिपुष्टि: भवति। अनेन प्रकारेण एतेषां सर्वेषां सहयोगेन
स्थायिभाव: व्यञ्जनाशक्तिद्वारा व्यक्त: भवति। तथा च
रस: (रसनीय:) (आस्वादनीय:) भवति। रसवादिन: आचार्या:
इममेव रसं इति कथयन्ति। लोके ललनादीनां रति
भावानां उत्पत्ति: भवति। भुजाक्षेप:, कटाक्ष: इत्यादय: कार्यरूपं
धारयन्ति। तेन च निर्वेदादीनां सहकारिभावानां संयोगेन

रसस्य उपस्थितिः भवति । सामाजिकस्य हृदये रसास्वादनस्य निर्माणे विभावाः अनुभावाः तथा च सञ्चारी भावाः लोकोत्तरं रूपं धारयन्तः रसस्य उद्बोधकाः भवन्ति ।

उदाहरणार्थं लोके दुष्यन्तस्य मनसि शकुन्तलां दृष्ट्वा रतिभावस्य प्रादुर्भावः भवति । उद्यानं, चन्द्र-चन्द्रिका, इत्यादीनि कारणानि तस्य रतिभावस्य उद्दीपकाः भवन्ति अनेन आधारेण काव्यनाटकेषु वर्णितायाः शकुन्तलायाः भावाः शृङ्गार रसस्य आलम्बनविभावं इति रूपं धारयन्ति । तथा च चन्द्रप्रकाशः उद्यानम् च रति भावः उद्दीपकाः भवन्ति । अतः अपि विभावाः विभावनव्यापारेण भवति । एतादृशी स्थिति अन्य रसानां सम्बन्धेऽपि अस्ति । अनुभावाः :- पूज्यपादैः अनु अर्थात् पश्चात् भवन्ति काव्य नाटकेषु अनुभावन-व्यापारेण एव एते अनुभावाः भवन्ति । अनुभावन व्यापारस्य आशयः सामाजिकस्य चित्त वृत्ति तन्मयता अस्ति एते भावाः अनेकभावेषु भिन्न-2 स्थायि भावेषु विभिन्नानां रसानां रूपं धारयन्ति । अतः मुख्यतया यदा विभावाः अनुभावाः तथा च सञ्चारी भावाः मिलित्वा यदा स्थायि भावस्य साहचर्यं प्राप्नुवन्ति तदा ते रस रूपं धारयन्ति । एतादृशमेव रसस्य स्वरूपं अस्ति ।

63. (5, 2, 6, 1.2)

2

प्रश्न 25: आचार्यभरतस्य रस सूत्रस्य विभिन्नानां आचार्याणां मतैः व्याख्यां कार्याः ?

उत्तरम्: आचार्यः भरतः स्वकीये नाट्यशास्त्रे रस निष्पत्तेः इदं लक्षणं अकरोत् ।

विभावानुभाव व्यभिचारि संयोगात् रसनिष्पत्तिः

नाट्यशास्त्रे आचार्यः कथयति यत् विभावानां, अनुभावानां व्यभिचारी भावानां संयोगेन रसस्य निष्पत्तिः अर्थात् पुष्टिः भवति अस्य रस सूत्रस्य परवर्तिभिः अनेकैः आचार्यैः व्याख्या कृता । तेषु व्याख्याकारेषु मुख्यतया आचार्यभट्टलोल्लटः, आचार्यशङ्कुकः, आचार्य-भट्टनायकः तथा च आचार्य-अभिनवगुप्तः । इमे आचार्यचतुष्टये विशेष रूपेण उल्लेखनीयाः सन्ति । इति चत्वारः आचार्याः मुख्य-रूपेण संयोगः तथा च निष्पत्तिः इति शब्दयोः व्याख्यां कृतवन्तः । तेषां व्याख्यायाः मुख्यकेन्द्रं एतद् शब्दद्वयम् अस्ति । क्रमशः तेषां आचार्याणां प्रतिपादितानि उल्लेखनीयानि सन्ति । प्रथमक्रमेण तत्र प्रथमं आचार्य भट्ट लोल्लटस्य मतमेव विवेचनीयम् अस्ति

आचार्यभट्टलोल्लटः कथयति यत् विभावाः अर्थात् ललनादिरूपकाः आलम्बनाः तथा च उद्यानादि द्वारा उद्दीपनकारणैः रति-आदि भावाः उत्पन्नाः भवति । अनुभावैः अर्थात् कटाक्ष भुजाक्षेपनं इत्यादिभिः कार्यैः सः रति प्रतीतिः योग्यः भवति । व्यभिचारी भावाः अर्थात् निर्वेदादिभिः सहकारी भावैः रतिरूपः रसः पुष्टः भवति । तथा च साक्षात् रूपेण अनुकार्ये "रामस्य अनुकरणे"

अथवा अभिनयः क्रियते तस्मिन् रामादौ एव रसः भवति परन्तु नटेऽपि रामादीनां रूपतया अनुभावेन स्थायिभावेन मिलित्वा सः रसः प्रतीति योग्यः भवति ।

5- भट्ट लोल्लटः :

भट्टलोल्लटस्य इदं कथनमस्ति यत् नायक नायिकयोः अनुभूतः रत्यादि स्थायिभावः एव संयोगः निष्पत्तिः शब्दस्य अर्थः अस्ति उत्पत्तिः । अनेन कारणेन इदं मतं उत्पत्तिवादः इति रूपेण अपि ज्ञायते । मतमिदं मीमांसासिद्धान्ते आधारितोऽस्ति तदनुसारेण ललना (नायिका) तथा च उद्यानादीनि लौकिक कारणानि क्रमशः आलम्बनविभावाः तथा च उद्दीपनविभावाः भवन्ति । ते भावाः रामादिगत रत्यादि भावस्य जनकाः तथा च उद्बोधकाः सन्ति रामादि गत भुजाक्षेपः एव अनुभावः अस्ति । तेन च रत्यादि स्थायिभावाः प्रतीतियोग्याः भवन्ति निर्वेदादिभिः सहकारिभावैः परिपुष्टः भवति । अयं रसरूपः स्थायिभावः मुख्यतया रामादीनां हृदये भवति परन्तु यदा कश्चिद् रामस्य वेशभूषा द्वारा रामस्य अभिनयं करोति तदा सामाजिकाः तेषु अपि रामस्य आरोपं कुर्वन्ति । सहृदयः सामाजिकानां हृदये एकस्याः विशेषचमत्कारस्य एव अनुभवः भवति । तथा च स एव अनुभवः रसरूपं प्राप्नोति । आचार्य शंकुकः अस्मिन्

यतो आक्षेपं करोति यत् यदा तदा च नाटके अभिनय
समये अनुकर्ता नटद्वारा अभिनयः क्रियते तदानीं
अनुकार्यः रामः तत्र विद्यमानः न भवति । यस्य अनुकरणं
क्रियते तस्य अनुपस्थितौ रसस्य अनुभूतिः कथं सम्भवा
अस्ति ? यदि च अनुकार्ये रामे एव रसस्य अनुभूतिः
स्वीक्रियते तदा श्रोतुः तथा च दर्शकस्य अस्मिन्
स्थितिकाले एतादृशी प्रतीतिः मात्रं भविष्यति । तेन च
लज्जा ईर्ष्यादयः भावाः समुत्पन्नाः भविष्यन्ति तेन कारणेन
अनुभूतिः केवलं कल्पिता एव भविष्यति । ~~अतः~~
अतः भट्टलोल्लटस्य इदं मतं उत्पत्तिवादः
इति रूपेण परवर्तिषु व्याख्याकारेषु प्रचलितम् आसीत्
परन्तु परवर्तिभिः विद्वद्भिः अनेन मतस्य स्पष्टरूपेण
समर्थनं न कृतम् ।

2- आचार्यशङ्कुक :-

अयं आचार्यः भरत सूत्रस्य "नाट्यशास्त्र"
इति ग्रन्थे द्वितीय व्याख्याकारः । इदं मतं अनुमीयमानवादः
इति रूपेण प्रचलितम् अस्ति । आचार्यः स्पष्टं करोति
[illegible] मन्ये । अन्यथा "अयमेव रामः" एतादृशी
सम्यक् प्रतीतिः अस्ति । न रामोऽयं, अस्य ज्ञानस्य
पश्चात् उत्तरकालिके कार्यवादे, अयं रामः इति मिथ्या
प्रतीतिः भवति । अयं रामः अथवा न एतादृशी
प्रतीतिः संशयप्रतीतिः अस्ति । रामसदृशोऽयं इति सादृश्य
प्रतीतिः अस्ति । परन्तु रसस्य अनुभूतिः "प्रतीतिः"

एताभ्यः चतुर्विधाप्रतीतिभ्यः सर्वथा भिन्ना भ्रान्तिः चित्रतुरगन्यायेन नटे अयमेव रामः एषा प्रतीतिः भवति। सा इयं "सम्भोग शृङ्गारः" अथवा हेणात् विप्रलम्भ शृङ्गारः काव्यस्य अर्थस्य साक्षात् अनुभवः करणेन स्वयं नटद्वारा शिक्षा एवं तस्य अभ्यासः तेन सम्पादितः नाट्यप्रकारेण प्रकाशितः सहकारिकारणः कृत्रिम भूत्वा अपि न तादृशः इति ज्ञायन्ते। अतः एते विभावादि भावाः स्थायिरूपस्य गम्य गमक-भावस्य सम्बन्धेन नटादौ इत्यादयः भावाः अनुमीयमानाः भवन्ति। सः स्थायि भावः अनुमित-भूत्वा अपि स्व सौन्दर्य कारणेन रस-नियतत्वेन विलक्षणा एव भवति। अयं रतिभावः नटे यद्यपि विद्यमानः न भवति तथापि तस्य उपस्थितिः तत्र मन्यते। अतः सामाजिकानां वासनाद्वारा आस्वाद्यमानं भूत्वा रसरूपं धारयति। अयं भावः अपि परवर्तिभिः आचार्यैः विशेषरूपेण समर्थित-मस्ति। सामाजिक द्वारा रसचर्वणस्य अनुमानः क्रियते। शास्त्रान्तरेषु अनेन प्रकारेण अपि कथयितुं शक्यते यत् वह्निकस्य आच्छादनेन धूम्रस्य भ्रान्तिः भवति. धूम्रेण सह नियमित रूपेण विद्यमानस्य अग्नेः अनुमानः क्रियते। अनेन एव प्रकारेण नटद्वारा सत्कौशलेन इमे विभावादयः [illegible] भावाः इत्यादि रूपेण रत्यादीनां अनुमानः क्रियते। तस्मिन् एव नटे अनुमीयमानस्य

61

• रतिभावस्य सामाजिकद्वारा आस्वादनं क्रियते अतः शङ्कुकस्य मतानुसारेण रसानुमीति एव रसनिष्पत्तिः अस्ति ।

आलोचना — परवर्तिनः अनेके आचार्याः अस्मिन् मतेऽपि दोषारोपणं कुर्वन्ति । तेषां कथनमस्ति मत् अनुमितेः (अनुमानस्य) सर्वाणि कारणानि कपोलकल्पितानि सन्ति । यदि स्थायिभावस्य सम्भावना मात्रमस्ति । यदि रत्यादीनां अनुमिति अपि भवेत् तर्हि सामाजिकानां हृदयेषु चमत्कारस्य उत्पत्तिः न भविष्यति यतः प्रत्यक्षं अनुभूतिः एव चमत्कारस्य कारणं भवति । द्वितीयं इदं मत् लोकप्रसिद्धिद्वारा रसस्य साक्षात् अनुभवः एव सिद्धः भवति न तु अनुमितिः । यतः अहं रसस्य साक्षात्कारं करोमि एतद्विधमपि अनुभवः दृश्यते । तृतीयः अपि दोषः मत् सामाजिकस्य अनुभवोऽपि निश्चयः भवति मत् इमे वस्तुतः सीतादयः विभावाः न सन्ति, तदा तु नटेऽपि रत्यादीनां विभावानां अनुमितिः न भविष्यति । तथा च ते कथञ्चिदपि रसस्य आस्वादनं न करिष्यन्ति । अतः इदं मतमपि सर्वथा विवाद-परिपूर्णं । अनेन कारणेन परवर्तिभिः आचार्यैः अस्य विशेषरूपेण समर्थनं न कृतम् ।

6 भट्टनायकस्य मतम् :

तृतीय मतं (आचार्य भट्टनायकस्य अस्ति । आचार्यः भिन्न-रूपेण भरत सूत्रस्य व्याख्या करोति । अस्य कथनमस्ति यत् रसस्य सम्बन्धः न तु तटस्थेन सह अस्ति, न तु आत्मगत रूपेण सामाजिकेषु अर्थात् अयं रसः न तु नटादौ न तु सामाजिकेषु प्रतीति-योग्यः अस्ति । अतः रसस्य रसस्य न तु उत्पत्तिः भवति न तु अभिव्यक्तिः अपितु काव्यनाटकेषु अभिधायाः भिन्नः एव एकः अनुपमः भावकत्व नामकः व्यापारोऽस्ति । यस्य स्वरूपस्य विभावादीनाम्च साधारणीकरणम् भवति । तेन साधारणीकृतः भाव्यमानः स्थायिभावः तेन भोगेन च आस्वादनेन भोजक व्यापारेण वा सः भुज्यते यदा सामाजिकानां सहृदयजनानां हृदयेषु सत्वगुणस्य उद्रेकः तथा च तद्द्वारा रजोगुणः तमोगुणस्य अभाव शून्यो भवति तदा एकः प्रकाशात्मिकः आनन्दात्मिका च अनुभूतिमात्रं भवति । यस्मिन् समये सहृदयजनः रसानुभूति करोति तस्मिन् समये अन्यद् वेद्यविषयस्य सर्वथा शून्यः भवति । तादृशी उद्रेकस्य या प्रकाशात्मिका स्थितिः भवति स एव काव्यशास्त्रे रस इति शब्देन ज्ञायते ।

आचार्य भट्टनायकस्य मतानुसारेण विभावादि द्वारा भोज्य-भोजक रूप-सम्बन्धेन सामाजिकानां

रसस्य आस्वादनं भवति अनेन हेतुना इदं मतं
भुक्तिवादः इति रूपेण प्रसिद्धम् ~~[illegible]~~ अस्ति।
इदं मतं सांख्य सिद्धान्ते आधारितमस्ति। अस्य
आचार्यस्य उत्पत्तिवादः पूर्वोक्तयोः द्वयोः आचार्ययोः
मतयोः आलोचनां करोति। आचार्यः तटस्थस्य
इति शब्देन स्पष्टं करोति यत् अभिनय काले
रामादयः नायकाः विद्यमानाः न भवन्ति तर्हि तेषां
रसानुभूतिः कथं भवितुं शक्यते? अनुमानद्वारा असत्
वस्तुनः ज्ञानमपि न भवति। अनेन कारणेन लौकिक
रतिभावः तत्र उत्पन्नोऽपि भवितुं न शक्यते। यतः
सीतादि विभावाः तत्र ~~[illegible]~~ वास्तविकाः न सन्ति।
अतः तेषां रत्यादीनां उत्पत्तिः तात्कालिकी असम्भवम्
सामाजिकानां हृदयेषु अपि रसस्य उत्पत्तिः अथवा
प्रतीतिः न भवति यतः विभावादीनां सामाजिकेन
सह कोऽपि सम्बन्धः नास्ति। अभिव्यक्तिः इति शब्दस्यापि
एतादृशी स्थितिः अस्ति। अभिव्यक्तिः केवलं तस्य वस्तुनः
भवति यत् विद्यमानं भवति परन्तु अत्र रसस्य
पूर्वकालिका विद्यमानता नास्ति अतः तदभावे व्यञ्जनाऽपि
तस्य निरर्थका? अतः [illegible] रूपेण रसस्य उत्पत्तिः
अथवा अनुमितिः अथवा अभिव्यक्तिः नास्ति।
अस्य आचार्यस्य मतानुसारेण काव्य नाटकानां शब्देषु
अभिधायाः लक्षणायाः च भिन्ना एका अन्या विलक्षणा
शक्तिः भवति। सा विलक्षणा शक्तिः एव भावकत्वव्यापारः
अस्ति। इयं काव्यनाटकादीनां भावकत्व शक्तिः अस्ति

यथा लौकिक कार्य कारणानि सहकारिकारणानि च आलम्बनादिकारणे भवति । काव्यनाटकेषु शब्दस्य अभिधा व्यापार तत् भावकत्व भोजकत्व नामका व्यापाराः भवन्ति । काव्यार्थबोधस्य पश्चात् भावकत्व व्यापारद्वारा सीतादिरूप विभावादि तथा नायकगत रत्यादयः भावाः साधारणीकरणे प्रकल्पिताः भवन्ति । अतः सहृदयाः जनाः भोजकत्व व्यापार द्वारा तस्य आस्वादनं कुर्वन्ति । यद्यपि परवर्तिभिः आचार्यैः अस्य बाहुल्येन समर्थनं न कृतम् परन्तु रसस्य साधारणीकरणं अन्ये आचार्याः अनुपमं स्वीकुर्वन्ति ।

1.2 आचार्य अभिनव गुप्तः –

आचार्यः अभिनवः गुप्तः रससूत्रस्य चतुर्थः तथा महत्त्वपूर्णः व्याख्याकारः अस्ति । अस्य इदं मतं परवर्तिभिः आचार्यैः समर्थितमस्ति साहित्यजगति च इदं मतं साधर्म्यं दृश्यते । आचार्य अभिनवगुप्तः रससूत्रस्य व्याख्यां अभिव्यक्ति प्रकारेण करोति । लोके अर्थात् काव्यनाटकयोः भिन्न प्रमदाद्वारा रत्यादीनां स्थायिभावानां अनुमानकरणे निपुणानां सामाजिकानां हृदयेषु वासना रूपेण स्थिताः रतिभावोऽस्ति । यः भावः काव्यनाटकेषु प्रमदादि द्वारा अभिव्यक्ताः भवति कारणादि रूपं त्यक्त्वा विभावनादि व्यापारः अलौकिक विभावः अनुभावः इति शब्दैः उच्यन्ते ते भावाः मदीयाः न मदीयाः, न अन्य

11

बालेन्दुः

न तु उदासीनस्य, अनेन प्रकारेण विशेषसम्बन्धस्य स्वीकृतिद्वारा, पुनः एते जायन्ते – न एते मदीयाः न तु शत्रुणो न तु उदासीनस्य अनेन प्रकारेण विशेषसम्बन्धस्य निषेधद्वारा ~~स्थ~~ विभावाः निश्चयस्याभावे सामान्यरूपेण प्रतीताः भवन्ति । यद्यपि स्थायिभावः सामाजिकस्य हृदये व्यक्तिगत प्रमातृरूपेण स्थितः भवति तथापि साधारणीकरणव्यापारबलेन तस्मिन् समये सीमित प्रमातृ भावस्य कारणेन आविर्भूताः भवन्ति । अन्ये ऐयस्य समयेषु अयं भावः प्रमातृ द्वारा समस्त सहृदयानां हृदयेषु भावितः भवति । अयं रतिभावः अभिन्नरूपेण अनुभूतो भूत्वा आस्वादमात्रं भवति ।

अयं ~~अयं~~ रसः प्रधानकरसः इव भवति । रसस्य एक नामकरणम् असम्भवं न अपितु कठिनं तु अस्ति ।

आचार्यः अभिनवगुप्तस्य इयं व्याख्या अनेन कारणेन अपि परवर्तिभिः आचार्यैः स्वीकृता अस्ति । यत् स्थायिभावस्य विभावादीनां सह व्यङ्ग्य-व्यञ्जकभावरूप-सम्बन्धेन रसस्य अभिव्यक्तिः भवति । अतः अस्य मतं व्यक्तिवाद इति नाम्ना विख्यातम् अस्ति । सामाजिकानां हृदयेषु संस्काराः यावन्तः जागरूकाः भवन्ति ते तावन्तः एव रसास्वादनं कर्तुं शक्नुवन्ति । परन्तु

येषां ~~ये~~ संस्काराः नष्टप्रायाः सन्ति । ते काव्यनाटकेषु रसास्वादनं कर्तुं न ~~इति~~ अर्हन्ति । वासनारूपेण स्थिताः भावाः तेषु एव सामाजिकेषु अभिव्यक्ताः भवन्ति । ये लौकिक जीवने रत्यादीनाम् अनुभूतिं कृतवन्तः । अतः सहृदय –

सामाजिकेषु एव रत्यादि स्थायि भावस्य अभिव्यक्ति भवति । सहृदयतायाः, सहजाते संस्काराः तथा च रत्यादि स्थायिभावानां ज्ञानस्य आवश्यकता अस्ति। अतः आचार्य अभिनवगुप्तस्य कथनमस्ति यत् संस्काररूपेण स्थातुं शक्यते यत् सहृदयानां हृदयेषु रत्यादि भावाः संस्काररूपेण विद्यमानाः भवन्ति ते भावाः सहृदयजनानां मध्ये ललनादि कारणैः अनुभूतिः योग्याः भवन्ति काव्यनाटकेषु कारणादीनां त्यागं कृत्वा ते लौकिकाः भावाः अलौकिकानां भावानां रूपं धारयन्ति । तथा च काव्य शक्ति द्वारा सामान्य विभावादीनां प्रतीति योग्याः भवन्ति । सहृदयानां हृदयेषु स्थिताः रत्यादि स्थायि भावाः एते व्यञ्जनावृत्त्या अभिव्यक्ति योग्याः अर्थात् आस्वादन-योग्याः भवन्ति । एतादृशाः विलक्षणाः व्यापारः एव रसरूपं धारयन्ति।

13 प्र०२६ रसस्य अनिर्वचनीयता (वा)

रसस्य अलौकिकता साधनीयाः ?

उत्तरम् – साहित्ये रसस्य महत्त्वपूर्णं ~~[illegible]~~ स्थानं अस्ति । रसः रस्यते, आस्वाद्यते इति रसः। लौकिकता रामो सीता आदि कारणानि भवन्ति विभावादीनां माध्यमेन यदा ते रसरूपं धारयन्ति तदा ते लौकिकाः भावाः "विभावाः" अलौकिकतां धारयन्ति । ते लोकेतु वाच्यनीयाः (वर्णनीयः)

भवन्ति परन्तु रसः तु प्रायः अनिर्वचनीयाः (वाणी द्वारा अवर्णनीयाः) भवन्ति । अतः एव आचार्याः रसस्य अनुभूतिं तादृशमेव वर्णयन्ति यथा मूकस्य मुखे गुडास्वादः । सः मूकः गुडस्य आस्वादनं तु करोति परन्तु वाण्याः अभावेन तस्य स्वादस्य वर्णनं कर्तुं न पारयति । अत एव रसः केवलं अनुभूतिः योग्यः न तु वर्णनीयः । ~~[illegible]~~ अस्ति ।

रसस्य अलौकिकतायां आचार्यद्वारा चत्वारि कारणानि वर्णितानि सन्ति ।

(1) रसः न कार्यः न ज्ञाप्यः,

2 रसः उपचारस्य माध्यमेन कार्यः अपि अस्ति ज्ञाप्यः अपि च

3 रसस्य ग्राहकं निर्विकल्पकं ज्ञानमस्ति न तु सविकल्पम्

4 रसानुभूतिः निर्विकल्पिका तथा च सविकल्पिका उभयात्मिका अस्ति ।

1 रसः न कार्यः न ज्ञाप्यः -

आचार्यः मम्मटः रसस्य अलौकिकतायां प्रथमं कारणं स्थापयति तदनुसारेण रसः कार्यः नास्ति यदि सः कार्यः स्यात् तदा विभावादीनां कारणानां नाशेऽपि रसः स्थितः स्यात् परन्तु एतादृशं न भवति यावत् विभावादयः भावाः सन्ति तावदेव रसस्य उपस्थितिः रसः विभावादिद्वारा ज्ञाप्यः अपि नास्ति यतः तद्वस्तु ज्ञाप्यं भवति यत् पूर्वमेव विद्यमानं भवति । अन्धे कक्षे पूर्वं विद्यमानः एव घटः दीपस्य प्रकाशेन

लादितः भवति । तद्वत् रसस्य स्थितिः नास्ति । अपितु विभावादिभिः व्यञ्जनया व्यक्तः रसः आस्वादनीयः भवति । यदि कश्चिद् वदति यत् कारकात् ज्ञापकात् च भिन्नः हेतुः न भवति तर्हि इदमेव स्पष्टं भवति यत् यद्यपि सः रसः कारकस्य ज्ञापकस्य माध्यमेन दर्शनीयः स्यात् अथवा न स्यात् परन्तु रसस्य अलौकिकत्वमपि इदं भूषणं (अस्ति) न तु ~~दूषणं~~ दूषणम्

2 = रसः उपचारस्य माध्यमेन कार्यः अपि अस्ति ज्ञाप्यः अपि च ?

उपचारमात्रेण रसः कार्यः अपि भवति तथा च ज्ञाप्यः अपि, इदं केनापि उच्यते यदि रसः कार्यः अथवा ज्ञाप्यः नास्ति तर्हि "उत्पन्नो रसः" ~~"ज्ञाप्यो रसः"~~ इत्यादीनां व्यवहारः कथं सम्भवमस्ति ? वस्तुतः स्थितिः एतादृशी अस्ति यदा रसस्य आस्वादनं अथवा चर्वणम् भवति तदा एव रसस्य अभिव्यक्तिः मन्यते । अत्र निष्पत्तिः अथवा उत्पत्तिः आस्वादनस्य भवति न तु रसस्य । उत्पन्नो रसः इति तु औपचारिकरूपेण प्रयुज्यते । यद्यपि रसः ज्ञाप्यः नास्ति तथापि एकस्मिन् विशेषरूपे रसः साध्यः अपि अस्ति तथा च ज्ञेयोऽपि । तस्य ज्ञाप्यत्वं लोकोत्तरं विद्यते । लोके वयं त्रिविधं ज्ञानं पश्यामः । प्रथमं

प्रत्यक्षकुत्र द्वितीयं प्रत्यक्षादि प्रमाणं सहित सविकल्पकं ज्ञानं तृतीयं तदन्ति यद् योगीनां निर्विकल्पकं समाधौ भवति। परन्तु रसानुभवे स्वयं संवेदनस्य विषयः अस्ति। अस्मिन् लौकिकज्ञानवत् कल्पनादि विषयस्य सम्यक् अपेक्षितं न भवति। विभावादिद्वारा व्यञ्जितः रसः स्वयं संवेदनमस्ति। विभावादिद्वारा रसे स्वयं संवेद्यता अस्ति। अतः अस्मिन् लौकिक ज्ञेयता तु अस्ति। आभिप्राय रूपेण यदि कथ्यते तु ज्ञानगुणः। यत् मुख्यार्थे तु रसः कार्यः न ज्ञाप्यः किन्तु औपचारिके अर्थे अस्य कार्यता तथा ज्ञाप्यता कथ्यते।

3 रसस्य ग्राहकं न तु निर्विकल्पकम् ज्ञानमस्ति न तु सविकल्पकम् ?

रसः स्वसंवेदनस्य विषयोऽस्ति तथापि संवेदनमपि ज्ञानरूपमपि ज्ञानं भवति, निर्विकल्पकम् तथापि सविकल्पकं, निर्विकल्पकं ज्ञानं कीदृशं भवति यत् वस्तुनः स्वरूपस्य जातिः योजना तत्र न भवति। तस्मिन् विशेष्य विशेषणानां सम्बन्धस्यापि बोधः न भवति एतद् विपरीतं सविकल्पके ज्ञाने नामजात्यादीनां उल्लेखः भवति। तस्मिन् च ज्ञातुः ज्ञेयस्य च स्पष्टरूपेण प्रतीतिः भवति। यथा अयं ब्राह्मणः गौः। रसानुभूतिः निर्विकल्पकस्य ज्ञानस्यापि विषयः नास्ति। यतः तस्मिन् विभावादीनां परामर्शः आवश्यकम् भवति यदा विभावादीनां स्पष्टतया प्रतीतिद्वारा रसानुभूतिः भवति तदा निर्विकल्पकस्य ज्ञानस्य ग्राह्यता ग्राह्यता

कथं सम्भवं भवति । रसः सविकल्पकस्य ज्ञानस्य विषयः अनेन कारणेनापि नास्ति यतः रसस्तु आस्वादरूपत्वे लोकोत्तरस्य आनन्दस्य स्वरूपोऽपि अस्ति संवेदनात् भिन्नं किमपि वस्तु संवेद्यम् नास्ति । आस्वादने आस्वाद्यस्य च भेदस्य सम्भावना नास्ति । अतः रसानुभूतिः निर्विकल्पकम् ज्ञानं तथा सविकल्पकं ज्ञानं इति द्वयोः ज्ञानात् सर्वथा भिन्ना एव ।

5 रसानुभूतिः निर्विकल्पका तथा च सविकल्पका उभयात्मिका अस्ति । ->

रसः तथा च तस्य अनुभूतिः निर्विकल्पका सविकल्पका उभयात्मिका अस्ति यतः द्वयोः विरुद्धवस्तुनोः एकस्य अभावे द्वितीयस्य भावः भवति । अतः यदा स रसः निर्विकल्पकः नास्ति तदा निश्चितं निश्चित रूपेण सविकल्पकः भविष्यति यदा च सविकल्पकः नास्ति तदा तस्मिन् निर्विकल्पकता अस्ति एव । अनेन प्रकारेण रसानुभूतौ उभय भावरूपा विरोधं न दर्शयति अपितु रसस्य अलौकिकताम् एव ज्ञापयति । कार्यरूपस्य ज्ञाप्यरूपस्य च विषये अस्माभिः पूर्वमेव निवेदितमस्ति । लौकिक वस्तूनि विरुद्धधर्मीणि भवन्ति । परन्तु रसे विरुद्धधर्मोऽपि युगपद् सह्यते । अनुभवद्वारा अयं इदं सिद्धं भवति यतः सः

रसः अलौकिकः नास्ति वा अस्ति

एतैः चतुर्भिः कारणैः आचार्यैद्वारा इदमेव स्थापितं अस्ति यत् रसः अलौकिकः। यद्यपि रसस्य अलौकिकतायाः उल्लेखः आचार्य-भट्ट-नायकेन कृतोऽस्ति तेन च स्व-व्याख्याने परब्रह्म-स्वाद-सहोदरः अर्थात् यथा योगी योगद्वारा परमात्मनः साक्षात्कारं करोति तथैव सहृदयः जनः रसस्य अनुभूतिं करोति। अभिनवगुप्तद्वारा रसस्य विलक्षणतायां अलौकिकतायां च विशेषः तर्कः दत्तः अस्ति। काव्यशास्त्रे वस्तुतः भिन्न एव रसस्य सत्ता तेन स्वीकृतोऽस्ति यथा रसः अलौकिकः तथा तस्य अनुभूतिः अपि अलौकिकः एव। [योगदर्शने इदं समर्थितमस्ति यत् लौकिकं ज्ञानं निर्विकल्पकस्य समाधेः आत्मसाक्षात्कारः अस्ति। तस्मिन् च रसानुभूतिः सर्वथा विलक्षणा एव। अतः रसः सर्वथा अलौकिकः अस्ति।]

कथ्यन्ते केचन मन्यन्ते यत् यथा लौकिके संसारे अश्रुपातादीनि कारणानि दुःखशोकस्य भवन्ति तथैव काव्यस्य पठनमात्रेण अपि एतादृशी स्थितिः भवति अतः यदि तत्रापि दुःखशोकादीनां अश्रुपातादीनां च उपस्थितिः अस्ति तदा कथं रसस्य अलौकिकता ?

अस्य समाधानं रसस्य अलौकिकतायै एव साधयन् आचार्य मम्मटः पुनश्च इदं स्थापयति यत् अश्रुपातः काव्यद्वारा भवति। सः दुःखस्य न अपितु आनन्दस्य अवस्था भवति। यथा योगी

परब्रह्मणः साक्षात्कारं करोति तेन च तस्य साक्षात्कारजन्यं स्थायित्वं भवति। तदा तस्यां आनन्दस्य अवस्थायामपि अश्रुपातः दृश्यते। अतः अत्र केवलं आनन्दस्य उपस्थितिः भवति। लोकेऽपि वयं सुखानुभूत्यामपि अश्रुपातः दृश्यते परिवारस्य चिरकालेन अज्ञातस्य जनस्य यदा गृहे आयाति तदा तत् दर्शनेनापि सुखस्य अनुभूतिः भवति।

(14)

प्र० २३. 11- कः नाम ध्वनिः कति च अस्य मुख्याः भेदाः संक्षेपेण प्रकाशनीयाः?

उत्तरम् - ध्वनिः काव्यस्य द्वितीयं नाम अस्ति। यत्र सर्वथा व्यङ्ग्यस्य प्राधान्यं भवति तत्र एव ध्वनिकाव्यम् इति गण्यते। आचार्येण काव्यस्य लक्षणग्रन्थस्य प्रथमे उल्लासे काव्यस्य भेदाः इति प्रणीताः सन्ति तत्र तेन स्पष्टं कृतम् यत् काव्यस्य त्रयः भेदाः सन्ति। यथा उत्तमकाव्यं मध्यमकाव्यं तथा च अधमकाव्यम्। शब्दान्तरेषु उत्तमकाव्यमेव ध्वनिकाव्यमस्ति। मध्यमकाव्यम् गुणीभूतव्यङ्ग्यकाव्यं तथा च अधमकाव्यं चित्रकाव्यं इति नाम्ना ते काव्यभेदाः प्रचलिताः सन्ति। अधुना प्राप्तकाले आचार्यैः उत्तमकाव्यस्य अर्थात् ध्वनिकाव्यस्य उल्लेखं करोति।

~~ध्वनि~~ ध्वनिः मुख्यतः द्विविधः अस्ति

(1) लक्षणा मूलक ध्वनिः (2) अभिधा मूलक ध्वनिः च ।

लक्षणामूलकध्वनि, अविवक्षितवाच्यो ध्वनिः तथा च अभिधा मूलकं विवक्षितान्यपरवाच्यः इति नाम्ना प्रसिद्धमस्ति ।

(1) अविवक्षितवाच्य ध्वनि काव्यम् :

अविवक्षित वाच्य ध्वनिः पुनः द्वयोः भेदयोः विभक्तः अस्ति यथा (क) अर्थान्तर संक्रमितवाच्यः तथा च (ख) अत्यन्त तिरस्कृतवाच्यः ।

(क) अर्थान्तर संक्रमितवाच्यः :

अर्थान्तर संक्रमित वाच्यध्वनिः तत्र भवति यत्र व्यञ्जके आगतः वाच्यार्थः स्वरूपे अनुपयुक्तः भवति तथा च लोकेऽन्यस्मिन् परिणतः भवति परन्तु अर्थान्तरं स्वार्थः भवति यः वाच्यार्थेन लक्ष्यार्थेन सह सामान्यरूपेण सम्बन्धं स्थापयति । वाच्यार्थस्य प्रकारान्तरेण लक्ष्यार्थे परिणतिः स अर्थान्तर संक्रमितः अस्ति यथा — काकेभ्यो दधि रक्षताम् ।

अत्र काक इति शब्दस्य अर्थः दध्युपघातक रूपे परिणतः भवति ।

(ख) अत्यन्त तिरस्कृत वाच्य ध्वनिः :

अयं ध्वनिः भेदः तत्र भवति यत्र व्यञ्जके आगतः वाच्यार्थः प्रकरणस्य दृष्ट्या स्वरूपे सर्वथा अनुपयुक्तः भवति अर्थात् अर्थस्य बोधं न कारयति स्वार्थं सर्वथा परित्यज्य अन्यार्थस्य लक्षक मात्रं भवति ।

एतादृशी स्थिति उपादान-लक्षणायाः प्रसङ्गे दृश्यते ।
यथा :- "उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता
भवता परम्" इत्यादि । अत्र अस्मिन् उदाहरणे
उपकृतम् (इत्यादयः) शब्दाः स्वकीयं स्वरूपं
सर्वथा परित्यज्य विपरीतार्थे एव अर्थं प्रतिपादयन्ति
(स्व) प्रति (किल) अपकारक-जनं प्रति, भवता उपकृतम् इति
शब्देन अपकृतम् इति शब्दस्यार्थे प्रयोगं करोति ।
(मित्रस्य स्थाने शत्रोः अपकारस्य अत्र वर्णनमस्ति)

२ विवक्षितान्यपरवाच्यः :-

अस्मिन् भेदे वाच्यार्थः विवक्षितः भवति
प्रकरणस्य दृष्ट्या अन्वययोग्यार्थोऽत्र गृह्यते
किन्तु स्वकीयात् अधिक रमणीयस्य व्यङ्ग्यार्थस्य
प्रतीतिः हेतवे स्व स्वरूपं गौणं निर्धारयति ।
तत्र व्यङ्ग्यार्थः एव रमणीयः भवति वाच्यार्थः
तु केवलं तस्य प्रतीतिः उपायमात्रमस्ति । अतः
वाच्यार्थः व्यङ्ग्यान्यपरे अर्थे अन्तर्भूतो भवति
अत्रापि भेदः दृश्यते तत्राभिधामूलकस्य
व्यङ्ग्यार्थस्य प्रधानता भवति तत्र व्यङ्ग्यार्थः
(भवति ध्वनि काव्यस्य अभिधायाः आधारे आधारितो
(के आश्रिताः)
भवति । अभिधामूलकः व्यञ्जना द्वारा
एतादृशस्य विलक्षणार्थस्य प्रतीतिः भवति या केवलं
सहृदयजनैः एव वेदनीयः भवति] ~~[illegible]~~
~~[illegible] अभिधामूलकः [illegible]~~
~~[illegible]~~ । [अभिधामूलकः ध्वनिरपि द्वयोः

विभक्तोऽस्ति ।

भेदयोः ~~विभाजितः भवति~~ । एतादृशास्वरूप नास्ति स्तनेः भेदाः ।

(1) प्रश्न: आचार्य मम्मटेन रसस्य कति भेदाः प्रमाणिताः सन्ति संक्षेपेण सर्वेषां परिचयाः देयाः ?

उत्तरम् :- आचार्यः मम्मटः विभावादीनां कारणानां माध्यमेन रसस्य सत्तां स्वीकरोति । रसस्य स्वरूपे आचार्येण स्पष्टमेव कृतमस्ति यत् विभावादयः भावाः कदा कथं च रसस्य उत्पादकाः भवन्ति , रसः रसनीयः आस्वादनीयः भवति अतः काव्ये रसस्य मुख्य स्थानमस्ति । आचार्यः मम्मटः चतुर्थे कारणः रसस्य अलौकिकतामपि स्थापयति अत्र रसानां संख्या अनयोति रस भेदाः दर्शनीयाः सन्ति । ग्रन्थस्य प्रथमायां कारिकायां आचार्यः मम्मटः "नव रस रुचिराम्" इति शब्देन रसानां संख्या नव इति तत्र स्वीकरोति । परन्तु चतुर्थे उल्लासे रसभेद-प्रसङ्गे आचार्यः अष्टौ रसाः इति मत्वा रसानां संख्या अष्ट परिमिताः एव स्वीकरोति । तन्मतानुसारेण इमे रसाः शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः तथा च अद्भुतारिति मत्वा अष्टरसानामेव समर्थकोऽस्ति परन्तु स्वयमाचार्यः रस प्रकरणस्यान्ते शान्तः रसोऽस्ति मत्वा रसानां संख्या नव पर्यन्तमेव स्वीकरोति । आचार्यद्वारा प्रमाणिताः रसाः अनेन प्रकारेण दर्शनीयाः सन्ति ।

(1) शृङ्गार रसः :-

विभक्तोऽस्ति /

भेदयोः ~~विभाजितः भवति~~ / एतादृशाः रसाः सन्ति
वर्णने: भेदाः /

(2)

प्र० २४ आचार्य मम्मटेन रसस्य कति भेदाः प्रणीताः सन्ति तेषां सर्वेषां परिचयः देयः ?

उत्तरम् :- आचार्यः मम्मटः विभावादीनां कारणानां माध्यमेन रसस्य सत्तां स्वीकरोति । रसस्य स्वरूपे आचार्येण व्याख्यानं कृतमस्ति यत् विभावादयः भावाः कदा कथं च रसस्य उत्पादकाः भवन्ति, रसः रसनीयः आस्वादनीयः भवति अतः काव्ये रसस्य मुख्यं स्थानमस्ति । आचार्यः मम्मटः लौकिकैः कारणैः रसस्य अलौकिकतामपि स्थापयति । अत्र रसानां संख्यां कथयति रस भेदाः दर्शनीयाः सन्ति । ग्रन्थस्य प्रथमायां कारिकायां आचार्यः मम्मटः "नवरसरुचिराम्" इति शब्देन रसानां संख्या नव इति तत्र स्वीकरोति । परन्तु चतुर्थ उल्लासे रसभेद-प्रसङ्गे आचार्यः अष्टौ रसाः इति मत्वा रसानां संख्या अष्ट परिमिताः एव स्वीकरोति । तन्मतानुसारेण इमे रसाः शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः तथा च अद्भुतरसेति मत्वा । अष्टरसानामेव निरूपणं कृतमस्ति परन्तु स्वयमाचार्यः रस प्रकरणस्यान्ते शान्तः रसोऽपि मत्वा रसानां संख्यां नव पर्यन्तमेव स्वीकरोति । आचार्यद्वारा प्रणीताः रसाः अनेन प्रकारेण दर्शनीयाः सन्ति ।

(1) शृङ्गार रसः →

22

शृङ्गार-रसः कालिदासमतेन रसराजोऽस्ति।
शृङ्गारस्य संयोगस्य दशायां सम्भोग शृङ्गारः तथा च
वियोगस्य दशायां विप्रलम्भः शृङ्गारः इति द्वौ
भेदात्मकौ अपि रसः उल्लिखितौ स्तः।
सम्भोग शृङ्गारस्य उदाहरणम् —

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।

अस्मिन् उदाहरणे सम्भोग शृङ्गारस्य द्वयोः दशानामपि अस्ति, (अनेन कारणेन [illegible] मूलकाव्यस्य उदाहरणमपि प्राप्यते)। नायिका नायकं केनापि व्याजेन चुम्बितुं इच्छति। परन्तु निद्रायाः व्याजेन प्रसुप्तः नायकः स्वयमेव तस्याः उपभोगं करोति।
विप्रलम्भ शृङ्गारे नायकनायिकयोः कदाचिदपि संयोगः न भवति। यथा —

प्रणयकुपितां धातुरागैः शिलायाम्-
[illegible] चरणपतितं यावदिच्छामि कर्तुम्।
[illegible] दृष्टिरालुप्यते मे
[illegible] नापि न सहते सङ्गमं नौ कृतान्तः।

[illegible] वियोगे नायकः यद्यपि
आलेख्ये [illegible] तां मिलितुमिच्छति,
[illegible] तत्र [illegible] प्रकृत्या
[illegible] तयोः मेलनं बाधयति।

शृङ्गार-रसः कालिदासमतेन रसराजोऽस्ति।
शृङ्गारस्य संयोगस्य दशायां सम्भोग शृङ्गारः तथा च वियोगस्य दशायां विप्रलम्भः शृङ्गारः इति द्वौ भेदात्मकौ अपि रसः उल्लिखितोऽस्ति।
सम्भोग शृङ्गारस्य उदाहरणम् –

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।

अस्मिन् उदाहरणे सम्भोग शृङ्गारस्य स्फुट दर्शनं भवति, (अनेन कारणेन मतकाव्यस्योदाहरणमपि प्रयुज्यते)। नायिका नायक कृतेनापि व्याजेन चुम्बितुमिच्छति। परन्तु निद्रायाः व्याजेन वस्तुतः नायकः स्वयमेव तस्याः उपभोगं करोति।
विप्रलम्भ शृङ्गारे नायकनायिकयोः कथञ्चिदपि संयोगः न भवति। यथा –

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः।

अस्मिन् उदाहरणे वियोगी नायकः कथञ्चिदपि शिलायां आलेख्य कृत्वा तौ मिलितुमिच्छति परन्तु वियोगेन तस्य नेत्रयोः प्रवहन्ती अश्रुधारा तत्रापि तयोः मेलनं बाधयति।

हा मातस्त्वरितासि कुत्र किमिदं हा देव्यः क्वाऽऽशिषः
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिरः
चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥

अतः अत्र विप्रलम्भशृङ्गारस्योदाहरणम्। स्नेहस्य विप्रलम्भस्य च स्थायिभावः रतिः भवति।

हास्यः रसः :-

हास्य रसः तत्र भवति यत्र हासः स्थायिभावः भवति। अन्ये भावाः तस्य सहकारी तथा रसव्यञ्जने नाट्यकाः विदूषकः भवन्ति — उदाहरणम्

" गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च।
अमी समाघ्राय च तर्कवादान् समागताः कुक्कुटमिश्रपादाः ॥"

अस्मिन् उदाहरणे विदूषकस्य आकारस्य वेषस्य विचित्रचेष्टाः हास्यमुत्पादयन्ति। कतिपयाः आचार्याः त्रिविधानां जनानां मध्ये प्रत्येकं जनस्य द्विविधं हास्यमिति मत्वा तस्य हास्य रसस्य षड् भेदानां निरूपणं कुर्वन्ति।

करुण रसः :-

करुण रसस्य स्थायिभावः शोकः भवति तथा च विभावादयः करुणानामकेन स्थायिभावेन योगात् करुणरसस्य पुष्टिं कुर्वन्ति। यथा उदाहरणम् :-

" हा मातस्त्वरितासि कुत्र किमिदं .... शतधा कुर्वन्ति भित्तीरपि,

अस्मिन् उदाहरणे कान्यकुब्ज नगरस्य राजमातुः मृत्यौ नगरवासिनः शोकालापं कुर्वन्ति। अत्र शोकः स्थायिभावः अर्थात् राजमाता आलम्बनविभावः तथा तस्याः देह संस्कारः उद्दीपन विभावः जनानां क्रन्दनं अनुभावः तथा च मोहव्याधि मोहव्याधयः व्यभिचारिभावाः सन्ति। अत्र सहृदय सामाजिकेषु शोकस्थायीभावः करुणः रसः अभिव्यक्तः भवति।

Note - महाकवेः भवभूतेः मतानुसारेण करुणरस एक एव मुख्यः रसोऽस्ति यथा —
एको रसः करुण एव निमित्तभेदात् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारानम्भो यथा सलिलमेव हि तत्समस्तम्॥

(5) क्षुद्राः सन्त्रासमेते विजहीत हरयः क्षुण्णशक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः । सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ।

4 रौद्र रसः :-

अस्य रसस्य स्थायिभावः क्रोधः अस्ति विरोधिनं प्रति शोधस्य भावना भवति यथा :-

कृतमनुमतं दृष्टं वा यैरिदं [corrected] करोमि दिशां बलिम् ।

अस्मिन् उदाहरणे शत्रु आलम्बन विभावः तस्य चेष्टाः उद्दीपन विभावः तथा च भुजानामुत्तोलनं नयनयोः प्रयोगः अनुभावः तथा च मोहः अमर्षः इत्यादयः व्यभिचारी भावाः सन्ति ।

5 वीर रसः :-

अस्य रसस्य स्थायिभावः उत्साहः भवति कार्यं प्रति उद्योगेन उत्साहः भवति ।

"क्षुद्राः सन्त्रासमेते विजहीत [illegible] राममन्वेषयामि । किञ्चिद् भ्रूभङ्गलीलानियमितजलधिं

अस्मिन् उदाहरणे मेघनादस्य कथने रामचन्द्रः आलम्बन विभावः रामस्य सेतुबन्धनं उद्दीपन विभावः, रामं प्रति उपेक्षाभावः अनुभावः तथा च निन्दति लज्जा गर्व इत्यादयः व्यभिचारी भावाः सन्ति ।

6 भयानक रसः :-

अस्य रसस्य स्थायिभावः भयः अस्ति । कस्मिंश्चित् भयावहस्य वस्तुनः कारणेन चित्ते या विकलता आगच्छति सा एव स्थितिः भयानकः अस्ति ।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।

[illegible] नायको निपतन्तः॥ शुक्रवेदेह च लज्जां दधाति परमां नायको निपतन्तः॥
लोकेऽस्मिन् विरहं पात्रं विकारि न हि कश्चित् मेघनादः
किंचिदन्न रामः ल्लीला निर्मितं जलधिं रामचन्द्रमपि

५ रौद्र रसः :-

अस्य रसस्य स्थायिभावः क्रोधोऽस्ति
विरोधिनं प्रति क्रोधस्य भावना भवति यथा :-
कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं (क्रोधं) करोमि दिशां बलिम् ।
अस्मिन् उदाहरणे शत्रुः आलम्बन विभावः तस्य चेष्टाः उद्दीपन विभावः तथा च भुजानां मुक्ततोलनं शस्त्राणां प्रयोगः अनुभावः तथा च मोहः अमर्षः इत्यादयः व्यभिचारी भावाः सन्ति ।

६ वीर रसः :-

अस्य रसस्य स्थायिभावः उत्साहः भवति कार्यं प्रति उद्योगस्य उत्साहः भवति ।
क्षुद्राः सन्त्रासमेते विजहत हरयः [illegible] रामचन्द्रमपि । किंचिदन्न [illegible] निर्मित जलधिं,
अस्मिन् उदाहरणे मेघनादस्य कथने रामचन्द्रं आलम्बन विभावः रामस्य सेतुः बन्धने उद्दीपन विभावः रामं प्रति उपेक्षाभावः अनुभावः तथा च स्मृति व्यभिचारी भावाः सन्ति ।

[illegible]

[illegible] अस्य स्थायिभावः भयः अस्ति ।
[illegible] कारणेन चित्ते या विकलता [illegible] भयोऽस्ति ।
[illegible] स्पन्दने बद्धदृष्टिः
[illegible] शरपतनभयाद् भूयसा पूर्वकायम्
[illegible] मुखभ्रंशिभिः कीर्णवर्त्मा
[illegible] बहुतरं स्तोकमुर्व्यां प्रयाति ।

(8) चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः।
लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृतिर्नूतन एष सर्गः॥

शाकुन्तलनाटके मृगमनुधावन् राजा दुष्यन्तः आलम्बन-विभावोऽस्ति शरपतनं उद्दीपन विभावः, ग्रीवाभङ्गः अनुभावः तथा च श्रमादयः व्यभिचारी भावाः सन्ति।

७ बीभत्स रसः —

अस्य रसस्य स्थायिभावः जुगुप्सा भवति घृणा युक्तस्य वस्तुनः दर्शनेन स्थायिभावः जागृतः भवति। यथा

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ — — [illegible]

अस्मिन् उदाहरणे शवम् अथवा प्रेतरङ्क एव आलम्बन विभावोऽस्ति, शवस्य मांस प्रेतद्वारा भक्षणं इत्यादि उद्दीपन विभावाः सन्ति। ष्ठीवनं नासिकासङ्कोचः इत्यादयः अनुभावाः तथा च उद्वेगादयः व्यभिचारी भावाः सन्ति।

८ अद्भुत रसः —

अस्य रसस्य स्थायिभावः विस्मयोऽस्ति। विलक्षणवस्तूनां दर्शनेन चित्तस्य विकासः एव विस्मयः भवति। उदाहरणम् —

चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः। लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृतिर्नूतन एष सर्गः।

विलक्षण वस्तु अत्र आलम्बन विभावः तद्वस्तु-गुणवर्णनं उद्दीपन विभावः स्वेदः रोमाञ्चः नेत्र विस्फारणादयः अनुभावाः वितर्कः आवेगः तथा च हर्षः व्यभिचारी भावः।

९ शान्त रसः — "निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः"

कतिपयाः आचार्यसम्मतेन अष्ट रसेषु अस्य रसस्य गणना न क्रियते तथापि निर्वेदः निर्वेद

योगी जनेषु दृश्यते । अनेन कारणेन आचार्य-
मम्मटेनापि अस्य रसस्य गणना कृता अस्ति ।
अस्य ~~स्थान~~ रसस्य ~~अस्था~~ स्थायिभाव: निर्वेद:
भवति संसारं प्रति उदासीनता ईश्वरं प्रति अनुरक्ति
एव शान्त रसं जनयति । यथा

अहौ वा हारे वा ———— (शिव शिवेति प्रलपत:) १९९

अस्मिन उदाहरणे मिथ्या रूपेण भावित: संसार:
आलम्बन विभावोऽस्ति, तपोवनस्य शान्तभूमि; उद्दीपन
विभाव: सर्पादौ समानदृष्टि अनुभाव: तथा च
मति:, धृति, हर्ष: इत्यादय: व्यभिचारी भावा: सन्ति ।
अनेन प्रकारेण पूर्ण रसानां
तदनन्तरं शान्तरसस्य विवेचनं आचार्य-
मम्मटेन कृतमस्ति ।

~~इति~~

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसा:
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपत: ॥

Vivek

1

काव्यप्रकाश

45
25
40
60
170

6 x 4 = 24
15
Total 39 - 3 = 36

P.
5 x 2 = 10 pp. Min
5 x 3 = 15 pp. Max.
speed required
10-15 min. p.

2. 10 x 4 = 40
15
55 - 15 = 40

I = 5 प्रश्नों
II = 9 प्रश्नों
III - 2 प्रश्नों
VII - 2 प्रश्नों
VIII - 5 प्रश्नों

3. 10 x 2 = 20
12 x 2 = 24

48
15
63 - 20

Main stress on the

1.
2.
3. I + II + IV
4. Text Book
5. Text Book

प्रश्नों
I — 4
II — 9 Nine.
III — 2
VII — 2
VIII — 4
IX-X — 22
IV — 4 (12 प्रश्नों के अनुरूप)

16
7॥ (1 Para)
5॥ (Para)
5॥ (1 Para)
7 (4॥ Next 3॥)

P. = 3 1/2 pp. = for one
1 + 1 + 1/2

17 1/2 pp. = 17 pp.
3 1/2 + 3 1/2 + 3 1/2 + 3 1/2 + 3 1/2

1st half = 1/2 P. (3॥ + 6॥)

2nd half = 1/2 P. (7॥ + 2॥ ... (5॥))

8॥ = प्रति अनुच्छेद
प्रति पृष्ठ = आविम दो ॥ से नया पेरा
उपसंहार = 6॥